
अथज्येष्ठमासमाहात्म्यंसटीकं प्रारभ्यते॥


स्कंदः
ऋषयः
विष्णुः
यमः
व्यासः
भीमः
सगरपुत्राः
दत्तः
पुलिंदः
पंचाग्नि साधकः
कदलीवनं
सावित्री पति मरणं
यमः

# अथ ज्येष्ठमास माहात्म्यविषयानुक्रमणिका


अध्यायांक· विषय·

१ ज्येष्ठमासमाहात्म्यजिज्ञासुभिः शौनकादिभिः पृष्टः स्कंदः काशीस्थदशाश्वमेधप्रशंसापूर्वकं स्नानदानादिमाहात्म्यं प्रतिपादयति ३४ श्लोकैः

२ दध्योदनदानेन गौतमब्राह्मणस्य विष्णुलोकगमनसमये विष्णुयमयोर्महायुद्धं २७ श्लोकैः

३ दशहराव्रतमाहात्म्यं २८ श्लो०

४ ज्येष्ठेपंचाग्निसाधनमाहात्म्य २० श्लो०

५ ज्येष्ठतृतीयायांरंभाव्रतम् २८ श्लो०

६ रंभाव्रतप्रसंगेनशिवशर्मकथानकं

७ मासोपवासव्रतं २८ श्लो०

८ मासोपवासव्रतप्रभावात् प्रसन्नोविष्णुः मेनकायां कन्यारूपेणप्रकटोबभूवेत्यादि सांगव्रतकथनंच श्लोक ३३

९ गौरीव्रतेनमेधावीब्राह्मणोरोगमुक्तोबभूवेतिकथा· २९ श्लोक·

१० दशहराव्रतमाहात्म्ये दशयोगप्रतिपादनंतेषांनिर्णयश्च २५ श्लो०

११ भागीरथीजाह्नवीस्वर्धुन्यादिनामप्राप्तिकारणनिरूपणं २४ श्लोक·

१२ गंगानयनप्रयोजनं वक्तुंसगरराज्ञः अश्वमेधवर्णनं तत्रइंद्रेणसहसागराणांमहायुद्धे इंद्रस्यपलायनम् २८ श्लो०

१३ पराजितस्येंद्रस्यविष्णुसकाशाद्दृश्यविद्याप्राप्तिः ततोविद्याबलेनयज्ञीयमश्वंगृहीत्वाकपिलांतिकेस्थापनंअश्वान्वेषणतत्पराणांसागराणांकपिलांतिकेभस्मीभवन· श्लो० २८

१४ ततः कपिलस्यसगरांतिकेआगमनं २५ श्लो०

१५ ततः प्रसन्नकपिलस्यसागराणामुद्धरणार्थंतवकुलेभगीरथोगंगामानयिष्यतीत्युक्तिः ३० श्लो०

१६ भगीरथचरित्रं २८ श्लो०

१७ निर्जलैकादशीमाहात्म्यं २४ श्लो०

१८ निर्जलाव्रतप्रसंगेनपुलिंदनृपेतिहासः सचातिगर्वेणप्राचीनबर्हिषंप्रतियोद्धुंजगाम तत्रचनिर्जलाव्रततत्परान्सर्वान्पीडयामासेति १५ श्लो०

१९ तेनातिक्रुद्धोविष्णुः रात्रावेवपुलिंदसेनांनाशयामासेति २९ श्लो०

२० ततः पराजितः पुलिंदः दत्तात्रेयंप्रतिगत्वावृत्तांतंकथयामासेति २५ श्लो०

२१ दत्तात्रेय कथितंनिर्जलाव्रतविधानं ३४ श्लो०

२२ वटसावित्रीव्रतमाहात्म्यं २६ श्लो० (३५

२३ सावित्र्याख्यानंपंचभिरध्यायैः ३८।३१।१७।२८

२८ ज्येष्ठस्नानमाहात्म्यकथन प्रस्तावेन वृंदारक ब्राह्मणस्येतिहासः २२ श्लो०

२९ ज्येष्ठस्नानदानमाहात्म्यश्रवणफलादिनिरूपणंयमेनमासमाहात्म्यगोपनकरणेकिंप्रयोजनमितिवक्तुंकनकब्राह्मणस्येतिहासः ३५ श्लो०

३० मासमाहात्म्यश्रवणमहिमाकथनप्रसंगेनदेवशर्मब्राह्मणस्येतिहासः ४८ श्लो०


इतिज्येष्ठमास माहात्म्यविषयानुक्रमणिका समाप्ता·

श्रीगणेशायनमः ब्रह्मादिनारायणोब्रह्मा विष्णुरुद्रादिदेवताः यस्यानुवर्तिनस्तस्मैनमोगोलोकवासिने १ अथपरमकारुणिको भगवान् बादरायणिःद्वापरान्तेकलौजनिष्यमाण लोकानांव्रततदानतपोभिः पापक्षयद्वारा परब्रह्मप्राप्त्यर्थं सूतशौनकसंवादनिरूपणेन मासानांमाहात्म्यंकथयन् प्रस्तुतंज्येष्ठमास माहात्म्यविषयेऋषिभिः कार्तिकेयंप्रतिकृतंप्रश्नंप्रस्तावयति ऋषयऊचुः माधवमासस्यवैशाखस्य वैशाखोमाधवोराधाइत्य

मासरू. ४ ज्येष्ठमा. गा. अ. १

श्रीगणेशायनमः ऋषयऊचुः श्रुतंमाधवमासस्यमाहात्म्यमपिविस्तृतम् तथापिमनसातृप्तिंनगच्छामःषड़ानन १ अतस्त्वंकृपयाब्रूहिसर्वसंतोषकारकम् माहात्म्यज्येष्ठमासस्यशृण्वतापापनाशनं २ कोदेवःकिंफलदानकोविधिःकथयस्वनः स्कंदउवाच साधुसाधुमहाभागाःपृष्टलोकोपकारकम् ३ माहात्म्यंशुक्लमासस्यकथयामियथातथम् विष्णुर्वैसर्वदेवानांज्येष्ठःश्रेष्ठःप्रजापतिः ४ तथायंसर्वमासानांज्येष्ठःश्रेष्ठतमस्मृतः सर्वेपिवासरायस्यश्रेष्ठावेपर्वसन्निभाः ५ अतःसर्वेषुलोकेषुश्रेष्ठोमासोविधीयते प्रातःस्नानंतदाकार्यंशौचाचारसमन्वितं ६ दशाश्वमेधिकेतीर्थेगंगायांलोकविश्रुते स्नानंज्येष्ठेहिकर्तव्यंसर्वपापप्रशांतये ७ दृष्वादशाश्वमेधेशंपुनर्जन्मनविद्यते तत्रपुण्यतमाज्ञेयादिवसाऽदृश्यसंभवा ८ यत्रावतीर्णस्रोतासाजान्हवीदुरितापहा तत्रापिपुण्यदात्यर्थेपापहामणिकर्णिका ९ तत्रस्नानानिदानानिकर्तव्यानिचभूरिशः उदकुंभांबुदानंचतालवृंतसचंदनम् १० त्रिविक्रमस्यप्रीत्यर्थंछत्रंचोपानहंतथा उपानहौप्रदास्यामिकंटकस्यनिवारणे ११

मरः १ २ ३ शुक्लमासस्यज्येष्ठस्य यथातथं यथार्थतः वास्तवमितियावत् तत्रादौज्येष्ठस्यसर्वमासेभ्यः श्रेष्ठत्वंप्रतिपादयति विष्णुरिति ४ श्रेष्ठत्वेकारणमाह सर्वेपीति ५ ६ स्नानेस्थलविशेषमाह दशाश्वमेधिकइति लोकविश्रुतेकाशिक्षेत्रस्थे ७ ८ अवतीर्णाःस्रोताः यस्याःसकाशादिति ९ भूरिशःअनेकधा उदकुंभदानकेवलंबुदानंच हंहातेश्रूयमाणपदप्रत्येकंसंबध्यतइतिन्यायेदानमित्यस्योभयत्रसंबंधः तालवृंतं तालपत्रीयव्यजनं १० उपानहंचर्मपादुका ११

उपानद्दानेसंकल्पमाह उपानद्भ्यामिति १२ छत्रदानेसंकल्पमाह इहेति १३ उदककुंभदानेसंकल्पः एषइति १४ व्यजनदानेसंकल्पः घर्मेति भूस्कराय ब्राह्मणाय उशीरस्कगधतृणविशेषः वाताइतिभाषया १५ १६ १७ १८ शूद्रौज्येष्ठे १९ २०

सर्वस्थानेषुस्करवद्भ्रमतःशांतिंप्रयच्छमे इहामुत्रातपत्राणंकुरुमेकेशवप्रभो १२ छत्रंत्वत्प्रीतयेदत्तंब्राह्मणाय कुटुंबिने एषकुंभोमयादत्तोशर्कराजलपूरितः १३ प्रदानादस्यतृप्यंतुत्रयस्त्रिंशत्तुदेवताः घर्मशांतिकरंनित्यव्यजनविष्णुवल्लभम् १४ त्रिविक्रमस्यप्रीत्यर्थंभूस्करायददाम्यहम् चंदनरुचिरंचारुकर्पूरोशीरसंयुतं १५ अस्यप्रदानात्तृप्यंतुदेवर्षिपितृमानवाः एवदानानिबहुशोदातव्यानिस्वशक्तितः १६ अन्नंचास्यजलंदेयंभूतेभ्योजलवर्जिते नदशक्तोद्विजाश्चास्यजलदानंदिनेदिने १७ अश्वत्थंवटवृक्षादीन्सिंचनबहुविधैर्जलैः जलदानात्परंदानं नभूतंनभविष्यति १८ तस्मात्सर्वप्रयत्नेनजलदानंविधीयते जलदानंतुयोमोहान्नकुर्वंतिशूद्रौनराः १९ तेभुक्त्वा निरयान्घोरान्भवंतिभुविचातकाः अत्रैतत्कथयिष्यामिइतिहासपुरातनम् २० पुरात्रेतायुगस्यांतेमाहिष्मत्यांद्विजोत्तमः क्रमतुर्नामधर्मात्मावेदवेदांगपारगः २१ तस्यभार्यागुणवतीदेवशर्मासुतस्तथा देवार्चनरतोनित्यंसर्वदाभ्यागतप्रियः २२ कदाचिद्दैवयोगेनसमिधार्थंवनंगतः भ्रमन्तश्चंडकिरणैस्तृषाव्याकुलितोबहु २३ वृक्षच्छायांसमाश्रित्यजलराशिसमीपगः पीत्वाजलंसमाविष्टोस्रष्वाप्यजलसन्निधौ २४ तद्भयात्तद्वनस्थायेमृगपक्षिगणादयः तृषार्ताव्याकुलीभूताः केपिपंचत्वमागताः २५

२१ २२ दैवयोगेनदेवानामिदंदैवं कर्महोमादितद्यो भ्रमन्तत्संसिद्धिहेतुना हेतौतृतीयासूर्यस्येतिशेषः २३ जलराशिःजलाशयः २४ तद्भयात्तदेवशर्मणोभयात् नचस्वधर्मनिष्ठस्य उक्तविदुषस्य च तस्यभयात्कथंपक्षिणोमृताइतिशंकनीयं तस्मिन्वनेएकएव सजलाशयो हिंसकमनुजसंचारसहितआसीत् अतःमृगपक्षिगणाः व्याधो

यंमृषास्कमइनिमत्वा पलायिताः केचनतृषानुराष्टनाम्बइनि तन्मरणस्यसंभवात् २५ निग्मप्रवरं तेजोयस्य एतादृशेसूर्ये कतिपयैरहोभि
रित्यध्याहारः २६ सतीदेवशर्मभार्या २७ कांतेयेतिसहार्थेतृतीया २८ शिवुरक्षः शेवगाइतिप्रसिद्धः पूर्वजन्मगतपुत्रत्वंस्मृदिनिधाय
पुत्रेणेत्युक्तिः २९ ३० ३१ निष्कृतिंपापनिर्दलनोपायं ज्ञात्वातेभ्यः सकाशादित्यर्थः प्रपांपानीयशालिकां निर्जलेजलरहितदेशे

विनिद्रःस्वगृहंयातोगतेस्तंनिग्मतेजसि अज्ञातदोषलिप्तांगः पंचत्वमगमद्भिजः २६ सतीविशेषदहनंत्यक्त्वापुत्रध
नादिकं तेनकर्मविपाकेनभुक्त्वाचनरकान्बहून् २७ चांतकींयोनिमासाद्य कांतयादुःखितोभृशम् स्मरन्पूर्वभ
वपापमागतस्वगृहेतदा २८ शिवुरक्षंसमाश्रित्यकरुणंरोदनेऽनिशम् श्रुत्वापुत्रेणबहुशोवारितोपिननिर्गतः २९
कोपाविष्टेनपुत्रेणदग्धतस्यचकोटरं दग्धपक्षौनदातोनुरक्षाधःपतितोनिशि ३० जज्ञल्पनुरयोकदृश्चुत्वापुत्रोपिवि
स्मितः प्रानर्गत्वाश्रमपुण्यतनःपृच्छन्द्विजाग्रणीन् ३१ निष्कृतिंस्वपितुर्ज्ञात्वायथौसानिजमंदिरम् प्रपाकृत्वावि-
धानेननिर्जलेकृषिंस मृतः ३२ तेनपुण्यप्रभावेनदिव्यदेहधरोतदा विमानवरमारूढोवैष्णवधामचागतो ३३ इ-
तितेकथितोविप्राःवृत्तान्तःपूर्वसंभवः जलरोधस्यदानस्यमहिमाकथितोद्भुतः ३४ इतिश्रीविष्णोत्तरपुराणेज्येष्ठमा-
हात्म्येप्रथमोऽध्यायः १ ७ स्कंदउवाच ज्येष्ठमासेविशेषेणब्राह्मणेभ्योदिनेदिने दध्योदनप्रदातव्यंद
वानानुष्ठिहेतवे १ दधिभक्तस्यमाहात्म्यंवक्तुनेशोहिभूधरः तथापिकथ्यतेकिंचिल्लोकप्रत्ययहेतवे २ अलकायां
पुराविप्राविप्रोभूद्गौतमाभिधः श्रुतिस्मृतिपुराणज्ञोद्रव्यहीनःसदुःखितः ३ कुटुंबपोषणोद्विग्नोकृत्वाकर्माणिसर्व
शः गृहीत्वासर्वदानानिनिर्विचार्यशुभाशुभं ४

३२ ३३ जलरोधस्यपानीयनिबंधस्य ३४ इतिप्रथमोध्यायः १ ७

भूधरः शेषः नईशनसमर्थः एवंचेद्भवद्भिस्तत्कथनेकुतःश्रमःक्रियतेतत्राह लोकप्रत्ययेति २ ३ ४ ७ ७

५ निरवर्तयत् संपादितवान् ६ बलिभुक्पिंडभक्षकः पितृकाननेस्मशानेबलिभुजैः वायसैः ७ ८ ९ १० तेनपु-

तत्रचौरैश्चसंगम्यचौर्यवृत्तिमथाकरोत् नचलेभेधनंकिंचित्तनोदेशांतरंगतः ५ लब्ध्वाकुटुंबंसकलंपापबुद्धिः क्षुधातुरः बलिदानैःप्रेतपिंडैर्वृत्तिंसनिरवर्तयेत् ६ एवद्वादशवर्षाणिबलिभुक्पितृकानने वसन्बलिभुजैः साकंसर्वकर्मबहिष्कृतः ७ क्षीणेशक्तिरभूत्सोथजराव्याप्तोगतायुषः ज्येष्ठेमासिद्विजानाच्चदधिभक्तभुजांतथा ८ गृहीत्वोच्छिष्टपात्राणिबलिदानानिसर्वतः तदन्नवायसेभ्यश्चकाकेभ्यश्चस्वलीलया ९ सोदकंदत्तवान्विप्रास्वयंभुज न्निजेच्छया एवंतेनकृतंविप्राश्चक्रेमासिनवुद्धितः १० तेनपुण्यप्रभावेनपंचत्वमगमद्द्विजः यमदूतैःसमागम्यबद्धःपा शैनतत्क्षणात् ११ नीयमानःक्रंदमानोताडितोमुद्गरैर्भृशं एतस्मिन्समयेराजन्विष्णुदूताःसमागताः १२ विमानवरमा रूढायमदूतान्व्यवारयन् दिव्यदेहधरंविप्रंकृत्वानिन्युर्दिवंगणाः १३ यमदूतागनानाथलोज्झिताइदमब्रुवन् दूताऊचुः त्वदान्नयैवभोयाताभ्यानेतुद्विजबंधुकं १४ तत्रविष्णुगणैरेत्यंताडितावयमुत्कटम् सनाथास्तेत्यनाथाहिवयंकिंकर-वामहे १५ अलंतत्सेवनेनात्रयामोन्यंस्वामिनंविभुं इतिदूतवचःश्रुत्वाचुक्रुधेतद्दिधर्मराट् १६ आरुत्यमाहिषंतू र्णंययौदंडधरःक्षणात् दंडेनताडिताःसर्वेदूताविष्णुसमाअपि १७ त्यक्त्वाविमानंतेसर्वेपेतुर्धातारमापतिम् निर्वे यमकलंवृत्तंविष्णुःकोपारुणोऽभवत् १८ पक्षिराजंसमारुत्ययमलोकंजगामसः युयुधेप्रेतराजेनसैन्यैर्दैवगणैःसह १९ यमेनदंडेनिहतेदेवायाताद्दिशोदश ततःकोपेनविभुनाचक्रेणनिहतोयमः २० पतितेधमराजेनुहाहाकारस्तदाभव त् ब्रह्माणपुरतःकृत्वाविष्णुस्तोतुंययुःसुराः २१

ण्यप्रभावेनेत्यस्य विष्णुदूताः समागताइति द्वितीयश्लोकस्थेनान्वयः ११ १२

१३ नार्ययमं द्विजबंधुकं नीचद्विजं १४ १५ १६ १७ १८ पक्षिराजंगरुडं १९ २० २१ ६२

स्तुत्याप्रसन्नोभगवान्धर्मराजमजीवयत् धर्मोपिनत्वादेवेशंक्षम्यतामितिचाब्रवीत् २२ स्वंस्वंस्थानंगताःसर्वेब्रह्मेंद्रादिपुरोगमाः अजानताकृतंयच्चदानंदध्योदनस्यच २३ तस्यप्रभावःकथितोकिंपुनर्ज्ञानतोनघाः तस्मात्सर्वप्रयत्नेनदानंदद्याद्दिनेदिने २४ पश्चिमांतद्विजातिभ्योदद्याद्दधिभोजनम् पादप्रक्षालनंकार्यंतस्मिन्मासेदिनेदिने २५ सगंधचंदनैश्चापित्वर्चयेद्विजपुंगवान् सगंधपुष्पमालाभिःपानकैर्विविधैस्तथा २६ सौगंधिकैःश्वव्यजनैर्वाजयेत्स्वयमेवच सगंधपुष्पमालाभिःपानकैर्विविधैस्तथा २७ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमाहात्म्येद्वितीयोऽध्यायः २ ७

स्कंदउवाच शृणुध्वंमुनयःसर्वेसर्वपापहरंशुभम् ज्येष्ठस्यदिनमाहात्म्यंपर्यायंचयथातथम् १ प्रतिपद्दिनमारभ्ययावद्दशमीभवेत् तावद्व्रतंप्रकर्तव्यंपुण्यंदशहराभिधम् २ स्नानंप्रतिदिनेकार्यंगंगायांसलिलेशुभे अभावेसर्वतीर्थेषु सर्वगंगासमंजलम् ३ मुच्यतेदशभिःपापैःशतजन्मार्जितैरपि महापापानिपंचैवतथोपपंचलघून्यपि ४ एवंदशविधैःपापैर्मुक्तोभवतिनान्यथा तत्रदानान्यनेकानिदत्तान्यक्षय्यमश्नुते ५ तृयाशुक्लाद्वितीयायामपराण्हेद्विजोत्तमाः समानोनामविख्यातःकल्पआविरभूत्किल ६ तत्रस्नानंचदानंचश्राद्धंचद्विजतर्पणं विष्णुमुद्दिश्ययैर्भक्त्याकृतंकोटिगुणंभवेत् ७ तथाशुक्लतृतीयायांपंचाग्निसाधनव्रतम् कृतंचेन्मासमात्रंतुसर्वपापैःप्रमुच्यते ८ तेजसासूर्यसंकाशोजायतेनात्रसंशयः अस्यामेवविशेषेणकार्यंरंभाव्रतंशुभम् ९ सधवाविधवाभिर्वास्त्रीभिःसर्वार्थसिद्धये अस्यामेवद्विजश्रेष्ठाःकल्पोभूद्ब्रह्मनस्यच १०

नाध्यायेन शृणु धमिति पर्यायमनुक्रमं १ २ ३ ४ ५

आविरभूत् तस्यप्रारंभोभूत् ६ ७ ८ पंचाग्निसाधनव्रतफलमाह तेजसेति ९ रंभाव्रताधिकारिण्याह सधवेति १०

दधिभक्तप्रदानेनतुष्टोभवतिवामनः श्राद्धंकुर्याद्घृतेनैवतर्पणंद्विजभोजनम् ११ तयैवमासपर्यंतंद्विजेभ्योदधिभोजनम् तथाशक्लचतुर्थ्यांतुकपिलस्याश्रमेशुभे १२ कुंडाद्विरभूद्देवश्चतुर्बाहुर्विनायकः अतस्तस्यांनभुंजीतसर्वे कार्यो महोत्सवः १३ पंचम्यांभोजयेद्विप्रान्पायसापूपसेचनैः अस्याशुक्लचतुर्थ्यांतुजातापूर्वोमासती १४ तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये उपहारैश्चविविधैःगीतनृत्योत्सवादिभिः १५ होमैःपयोभिर्बलिभिश्चपत्रैःपुष्पैःसुगंधिभिः मां पूजयंतुनरैषष्ठ्यास्त्रीभिःसंतानकांक्षिणः १६ सप्तम्यांज्येष्ठमासस्यज्येष्ठांनैवार्चयंतिये तत्रैववासोज्येष्ठायाभविष्यतिन-संशयः १७ अतस्तांतत्रसंपूज्यनरैर्दास्यभीरुभिः दशम्यांपूजयेद्गांयथाविभवसंभवैः १८ अवतीर्णायतःस्वर्गा-त्दशम्यांलोकपावनी ततस्तिथिरहोभिश्चसाध्यमेकादशीव्रतम् १९ निर्जलसमुपोष्यैवसर्वपापप्रणाशनम् त्रयोदशीं समारभ्यपौर्णिमांतंमहाव्रतम् २० सावित्रीतिचविख्यातस्त्रीणांसौभाग्यदायकम् सिंचंतीवटमूलानिब्रह्माणंरविनंदनं २१ सत्यव्रतंचसावित्रीपूजयेद्भूटसन्निधौ एवंदिनत्रयंकार्यंनिद्राहारविवर्जितम् २२ एवंकृष्णेपिकर्तव्यंपारणप्रतिप दिने नित्यस्त्रीभिःसदाकार्यंवर्षसाध्यतथापरम् २३ ज्येष्ठज्येष्ठायुताचेत्स्यात्कोटिपर्वशतादधिका तस्यादानानिदेयानि कथयामिसमासतः २४ तथातस्यांसमभवत्कूर्मकल्पस्तपोधनाः तत्रस्नानंचदानंचतर्पणंद्विजभोजनम् २५ पितॄ नुद्दिश्यकुर्वंतिनेयांतिपरमंपदम् यस्यामन्वंतरारंभःकृतोरौच्यनभूत्सराः २६ तस्माच्छ्राद्धंचदानंचपितॄणांतृप्तिदायकं एवंव्रतानिबहुशोमासेस्मिन्देवपूजिते २७ सक्षेपेणमयाख्यातंयथाशक्तियथामतिः एवंयेवैप्रकुर्वंतिसर्वपापैःप्रमुच्यते २८

इतिटीकायांतृतीयोध्यायः ३ पंचाग्निसाधनव्रतमाह ज्येष्ठेमासेति १ व्रतस्यप्रहृत्वे इतिहासंप्रमाणयति यस्येति शैवंपदं शिवस्यार्धांगमित्यर्थः २ व्रतस्यबहुफलत्वमवधार्यविधानश्रवणेजातोत्कंठाऋषयःपृच्छंति कथमिति कथंविख्यातं पंचाग्नीतिनामकथंप्राप्तमित्यर्थः ३

इतिभविष्योत्तरपुराणज्येष्ठमाहात्म्येतृतीयोऽध्यायः ३ ॐ स्कंदउवाच ज्येष्ठेमासिविशेषेणव्रतंपंचाग्निसाधनम् कर्तव्यंकामिभिःकामंसर्वकामार्थसिद्धये १ यस्यप्रभावाद्विरिंजाशैवमाप्नोत्पदंशुभम् ऋषयऊचुः कथंपंचाग्निविख्यातंकथितंतद्व्रतत्वया २ कार्यकेनविधानेनतत्सर्वंकथयस्वनः स्कंदउवाच पुरारुद्रेणभोविप्राःदग्धःकामःस्मरप्रदः ३ पार्वतीदीनवदनाशुशोचबहुवासरम् पितृसंप्रतिवासापिलेभेसानस्मरंक्वचित् ४ ऋषीणामाश्रमाणांचहिमाचलनिवासिनाम् पृच्छतिस्मतदाकालीत्युपायंचित्तनिर्वृतेः ५ ऋषिणांप्रवरस्तत्रभृगुर्वाक्यमथाब्रवीत् भृगुरुवाच पंचाग्निसाधननामव्रतंकुरुयथाविधि ६ पार्वत्युवाच स्वामिन्केनप्रकारेणकर्तव्यंव्रतमुत्तमम् भृगुरुवाच साधुपृष्टं महाभागेविस्तरात्कथयामिते ७ ज्येष्ठमासतृतीयायांप्रभातेविमलेजले स्नात्वानित्यक्रियांकुर्याच्छुक्लवासागृहव्रजेत् ८ पुण्याहवाचनंकुर्याद्ब्राह्मणान्भोजयेत्तथा समित्समिद्भांश्चतुरःकृत्वान पूज्यशंकितः ९ तेषामध्येस्थितश्चापिसवितारंसमीक्ष्यता यावदस्तमितोभानुस्तावत्तिष्ठेज्जितेंद्रियः १० एवमासव्रतंकार्यंनिराहारोजितेंद्रियः भृग्वर्षेर्गिरमाकर्ण्यसंतुष्टोमाव्रतम् ११ तेनोक्तेनविधानेनचकारशिवतुष्टये एवद्वादशवर्षाणिप्रतिज्येष्ठशुभानना १२ व्रतस्यास्यप्रभावेनशिवोमांहमुपागतः कृगनापार्वतीचर्तिविचार्यैवंसमाधिना १३

दग्धनेहेतुमाह अस्मरंप्रदइति ४ ५ ६ ७ ८ समित्समिद्भान् समिद्भिः सम्यक् इद्धान् प्रज्वालितान् पूज्यइत्यत्रत्यषआर्षः ९ १० ११ १२ १३ ७ ७ ७

वनचरोभिल्लादिस्तस्याकृतिरिव आकृतिर्यस्यतथाभूता १४ १५ १६ १७ १८ १९ अंतेव्रतस्यसर्वोत्तमत्वदर्शनायत-

ज्ञात्वातपोवनंतस्यायययौवनचराकृतिः याचयामासविविधैर्वाक्यैरमृतसंमितैः १४ तयानिर्भर्त्सितःसोथनिजरू
पमदर्शयत् ततःसागिरिजाविप्राक्रीडयाधोमुखीत्यभूत् १५ अकृकृत्वातुगिरिजांआलिलिंगमुदाशिवः ततोहि-
माद्रिस्तज्ज्ञात्वाआययौशिवसन्निधौ १६ पूजयामासविधिवदुपचारैरनेकधा गृहीत्वाज्ञांहिमवतासतपोवनवासि-
नीम् १७ अर्द्धांगेगिरिजांकृत्वाययौकैलासमात्मनः इतिवः कथितंविप्राव्रतपद्माग्निसाधनम् १८ माहात्म्यज्ये-
ष्ठमासस्यभूयःकिंश्रोतुमिच्छथ वहुभिश्चकृतंपूर्वव्रतसर्वार्थसाधनम् १९ धर्मार्थकाममोक्षाणांसाधनंपरमंव्रत
कुर्वतियेव्रतमिदंजगदीशतुष्टैतुष्टाश्चसर्वमनइप्सितकामभोगान् तेप्राप्नुवंतिविविधान्भुविकामभोगानतेव्रजंति
निलयंपरमस्यपुंसः २० इतिश्रीभविष्योत्तरपुराणेज्येष्ठमाहात्म्येचतुर्थोऽध्यायः ४ ऋ ऋषयऊचुः ज्येष्ठ
मासिविशेषेणस्त्रीभिः सौभाग्यदायकम् किंकर्तव्यंव्रतंदानंकथयस्वप्रसादतः १ स्कंदउवाच पुराकैलासशिखरे
रुरुवासीनंमहेश्वरम् प्रणम्यपार्वतीदेवीबद्धांजलिरभाषत २ पार्वत्युवाच शिवशंभोजगन्नाथसर्वज्ञरुरुवदा
यक ऐश्वर्यंरुरुसौभाग्यनास्तिमत्सदृशःक्वचित् ३ एतदक्ष्यतायांनियेनोपायेनशंकर अजरामरतांचैवत्वयास-
हकृपानिधे ४ सावित्रीरूपगर्विष्ठाभर्तुरंकमथात्यजत् गायत्र्याशापितासर्वत्वयासाननिवारिता ५ प्राणांस्त्यज
त्वंनिर्लज्जअजागलसमस्तनः सावित्र्यावचनंश्रुत्वाब्रह्माजज्वालकोपतः ६

दूणान्कथयति कुर्वंतीति २० इतिटीकायांचतुर्थोऽध्यायः ४ ५ रंभाव्रतंप्रस्तावयति ज्येष्ठइति १ २ ३ ४ आप्तसं
तशेषः ५ अजागलसमः अजायाः छाग्याः गलेलंबमानौ निष्फलौस्तनौतत्समः तौयथानिरुपयुक्तौनहत्वमपिभवेत्यर्थः ६ ७

मूढेरुक्षत्वमाप्नोपि बीजैरहितंभुवि देवैस्तुप्रार्थितोब्रह्माउच्छ्रापंप्रददौनदा ७ तद्ददस्वकृपासिंधोयदिमेस्यादनुग्रहः शिवउवाच अस्तिनाशोमहेंद्रस्यस्वर्लोकेचप्रजापतेः ८ सर्वेषांहरुपजानानानाशमस्तिवनेनरा तथापिकथयिष्यामितवभक्तिवशीकृतः ९ भद्रेकुरुष्वयत्नेनव्रतमुत्तमम् ज्येष्ठमासितृतीयायास्नात्वानियमतत्परा १० पार्वत्युवाच केयंरंभाकथंतस्याव्रतकार्यंसमाहिता सावित्रीब्रह्मणाशप्तात्राजडत्वरूपमास्थिता ११ सेयंरंभाचकदलीकापूर्वजननीतिच रुषाशप्तातुसावित्रीपितृवेश्मनिसंस्थिता १२ पित्रोपादिष्टमार्गेणज्येष्ठस्नानार्चनादिकम् चकारपंचवर्षाणितनःप्रीतःपितामहः १३ आविर्बभूवतस्याग्रेज्येष्ठमासितृतीयाशुभे वरान्ददौबहुतरान्शृणुष्वभुविदुर्लभान् १४ रंभाभवत्वमशेषलोकानुग्रहहेतवे येचैयंतिशुचौमासिभक्त्यात्वांचशुचिस्मिते १५ तासामक्षय्यतामेतिसौभाग्यसुखसंपदः सावित्र्यासहब्रह्माथसत्यलोकंजगामह १६ एतत्तेकथितंभद्रेसावित्रीशापकारणम् रंभाव्रतविधानंचकथयामिसमासतः १७ उद्यानेवागृहेवापिशक्त्यात्वांचशुभेमासितृतीयायामाहिजोत्तमाः १८ पंचामृतैश्चविविधैर्गंधतोयैःसकर्पुरैः पुष्पोदकैःशीतकैश्चनद्याचोसीरवासितैः १९ अलंकाराणिपूज्यानिकार्येऽह्निनेदिने एवंरम्यवनंकृत्वाब्रह्माणंनाभिसंस्थितम् २० सुवर्णनिर्मितंकृत्वापूजयेत्कलशस्थितं उपचारैःषोडशभिर्नैवेद्यैर्विविधैस्तथा २१ भोजयेद्ब्राह्मणान्शक्त्याहविष्यस्वयमेवहि गीतवादित्रनिर्घोषैःपुराणश्रवणादिभिः २२

१३ १४ १५ १६ १७ कदलीवनंस्थापयेत् कदलीःरोपयेत् पानीयसिंचनादिनातावर्धयेच्चेतिभावः १८ तासांकदलीनांदे ६
इतिबुध्या षोडशोपचारैःपूजनमपिकर्तव्यमित्याह पंचामृतैरिति १९ २० २१ २२ ६१ ६७

२३ २४ २५ २६ रहस्यंस्थापितंपुरा अद्यपर्यंतंनकथितमित्यर्थः २७ २८ इतिटीकायांपंचमोऽध्यायः ५
रंभाव्रतविषयकमितिहासंपृच्छति कथेति १ द्विजः ब्राह्मणः द्विजः कृतोपनयनादिसंस्कारः द्विजकुलश्रेष्ठः शुकुलोत्पन्नः २ ३ ४

जागरंतत्रकुर्वीतकथाश्रवणकीर्तनम् एवंप्रतिदिनंकार्यंकदलीवनसंस्थितः २३ इतिमासव्रतंकार्यंसर्वकामार्थिभिर्नरैः पूर्णेमासेतुतत्सर्वमाचार्यायनिवेदयेत् २४ दत्वादानान्यनेकानिगांचदद्यात्पयस्विनीं होमंकुर्याद्यथाशक्तिविप्रेभ्योभूरिदक्षिणाम् २५ स्वशक्त्याभोजयेद्विप्रान्पायसैःशर्करान्वितैः विसर्ज्यपारणंकुर्यात्स्वयंभ्यान्नददेबहु २६ एतत्तेकथितंसर्वंरहस्यंस्थापितंपुरा भद्रेशुकुरूपव्रयत्नेनफलंप्राप्नोतिशाश्वतम् २७ एतद्व्रतंकिलपुराजगदीश्वरेणसंगोपितंदिनकरात्मजनिग्रहेण तच्छ्रुत्वाप्रकटितंगिरिराजपुत्र्याभावेनइशकुपथ्यागुरुणाखिलस्य २८ इतिभविष्योत्तरेज्येष्ठमाहात्म्येपंचमोऽध्यायः ५ ६ पार्वत्युवाच कथाकृतव्रतामिदंफलप्राप्तयथातथम् तत्सर्वंसंतिहासेनकथयस्वममप्रभो १ शिवउवाच त्रेतायुगेद्विजःकश्चिद्दुर्जदिर्नामनामतः द्विजोद्विजकुलश्रेष्ठोधनीचबहुवाधवः २ अनपत्यस्तुदुःखार्तोमहानियममास्थितः व्रतदानान्यनेकानिचकारविधिपूर्वकम् ३ अथकालेनबहुनाजाताकन्यातिशोभना दिनेदिनेयथवृद्धेकन्याकमललोचना ४ स्वांविवाहोचितांकन्यांदृष्ट्वाभार्यामभाषत देयाकस्यसरूपेयंनसमोदृश्यतेवरः ५ निर्गतःस्वगृहात्तूर्णंवरान्वेषणतत्परः ग्रामाद्ग्रामांतरंगच्छन्पत्तनानिबहून्यपि ६ मंडलानिनृपाणांचक्षेत्राणिविविधानिच नावापकन्यकायोग्यंवरंसद्विजपुंगवः ७ तपोवनानिरम्याणिऋषीणांभावितात्मनाम् अथापश्यत्कौशिकस्याश्रमंद्विजपुंगवः ८

अमंत्रयत्प्रचारयत् विचारमेवाह देयेतिविचारे-

कारणमाह सरूपेति ५ तूर्णंशीघ्रं निर्गमनेकारणमाह वरान्वेषणतत्परइति ६ ७ ८ ९ १

दुष्टपुरुषंवर्णयति शिवशर्मेतीति ९ १० ११ नानिदूरात् स्वगृहसमीपे १३ १४ १५ १६ १७ १८

शिवशर्मेतिविख्यातःपितृभ्यांरहितस्तदा अपरंनामतस्यास्तिरूपराशीतिविश्रुतम् ९ नास्तितत्सदृशंरूपंसमस्तेभूमि
मंडले अयंऋषिभिरुद्गीर्णरूपराशिरितिस्फुटम् १० धूर्जटिस्वाशयंसर्वन्यवेदयतनान्मुनीन् तैरानंदोदितःसोपि
शिवशर्मेणसंयुतः ११ जगामनगरंस्वीयंहर्षेणोत्फुल्लमानसः सर्वैर्बंधुजनैःसार्द्धंविवाहमकरोद्द्विजः १२ नानिदू
राद्बृहद्दत्त्वागोधनानिधनानिच पारिबर्हंबहुविधंविप्रेभ्योभूरिदक्षिणाम्१३ शिवशर्मातयसाकंगुणवत्यास्कलीलं
या अपूर्वइवतत्प्राप्तप्रपंचजनितंसुखम् १४ अथकालेनबहुनासद्विजःकालचोदितः समिधार्थंवनयानःसंश्रां
तोदृक्षमाश्रयत् १५ पीत्वातच्छिशिरंतोयंस्कंधपचतरोरधः एतस्मिन्नंतरेविप्रोगिलितोजगरेणसः १६ तत्रापिना
ययुःकेपिभ्रमंत्यातोदिवाकरः श्वश्रूश्वशुरगेतत्पत्नीसेवकैःसहितवनम् १७ अन्वेषयामासनिशिदीपिकाभिःसमंत
तः एवमन्वेषमाणेषुभास्करस्योदयोभवत् १८ ततस्तेदुःखितानूननिराशागृहमागताः तत्रागुणवतीसाध्वीपितृ-
गेहनिवासिनी १९ देवार्चनरतानित्यंशोकाकुलितमानसा कदाचिद्दैवयोगेननारदःसमुपागतः २० विधिवत्पू
जयामासप्रणम्यचमुहुर्मुहुः नारदस्तुप्रसन्नात्माउपदेशंचकारह २१ नारदउवाच भद्रंकुरुश्वोमासिव्रतंरभा
भिधंशुभम् पूजयस्वविधानेनदेवंभर्तृस्वरूपिणम् २२ यावज्जीवंकुरुव्रतमनन्यमनसानघ विष्णुभर्त्तारमासा-
द्यस्थानमाप्स्यसिशाश्वतम् २३ इत्युक्तावचनंब्रह्मनंदनाद्विजवल्लभाम् वापयामासकदलीवनंवनविहारिणी २४
चकारसकलंकर्मनारदेनयथोदितं गतेबहुतिथेकालेजरयाव्यापिताभृशम् २५

१९ २० २१ शुक्लौज्येष्ठमासि २२

२३ वापयामास रोपणंकारितवान् २४ जरयावार्धक्येन २५

२६ २७ कुसुमावलिसैः पुष्पाणांगुच्छः तत्कुलैर्भूषणैर्वा २८ इतिटीकायांषष्ठोऽध्यायः ६ ७ भूयइति मासस-
भवंप्रकरणवशात् ज्येष्ठमाससंभवम् १ २ ३ ४ व्रतविधिंतत्फलंचाह त्रयोदश्यामिति ५ ६

तदासानिधनंप्राप्यविप्रकन्यादिवंगना तत्पुण्यनिचयाज्जातातुलसीविष्णुवल्लभा २६ नान्यत्किंचिल्लियंविप्रास्तु
ल्यास्त्कप्रियंकुले गिरिजापूचकारैवमाज्ञयागिरिजापतेः अस्यव्रतप्रभावेनगिरिजाशिववल्लभा २७ श्रुत्वाषड्वा
ननमुखात्महिमानमुच्चैर्ब्रह्मर्षयःप्रमुदिताःकुसुमावलिसैः पूजाप्रचक्रुरतुलागिरिजालिलिंगस्वानंदकंदमकरंदनि
भषडास्यम् २८ इतिभविष्योत्तरपु० ज्येष्ठमाहात्म्येषष्ठोऽध्यायः ६ ७ ऋषयऊचुः भूयःकथयतोभद्रमा
ह्यात्म्यमाससंभवम् यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते १ उपवासप्रियोविष्णुरुपवासव्रतसकृत् लक्षमाससमो
त्येकोमासोपवासनंव्रतम् २ स्कंदउवाच उपोष्यसकलमासंप्रातःस्नायीजितेंद्रियः कंदमूलफलाहारोभूमिशायी
विमत्सरः ३ शौचाचारयुतोनित्यसत्यवाक्प्रियदर्शनः प्रतिपद्दिनमारभ्ययावत्कृष्णत्रयोदशी ४ अतंद्रितोव्रतंकु
र्यात्मदमोहविवर्जितः त्रयोदश्यांसमुत्थायमंगलस्नानमाचरेत् ५ पुण्याहवाचनंकार्यमधिवास्यचदेवताः सौवर्णी
जतताम्रमृन्मयंवानवद्यं ६ स्थापयेत्कलशंदिव्यपंचरत्नसमन्वितम् तस्योपरिन्यसेद्देवंशरत्चक्रगदाधरम् ७ निर्मि
तंशातकुंभनलक्ष्मीगरुडसंयुतं ब्रह्मादिदेवताःस्थाप्याःस्वगृह्योक्तद्विजर्षभाः ८ पुष्पाणामंडिकाकार्याचतुर्हस्तोपशो
भिता कदलीस्तंभसंयुक्तास्तोरणैर्विविधैस्तथा ९ तन्मध्येपूजयेद्देवमुपचारैरनेकशः पक्वान्नैःपायसैःखंडैरोदनै
र्दीर्घसंयुतैः १० ऋतुकालोद्भवैःपुष्पैर्नारिकेलादिभिःफलैः धूपैर्दीपैश्चतांबूलैर्द्रव्यैःसौगंधिकैस्तथा ११

७ स्वगृह्येनस्वशाखोक्तगृह्यसूत्रविधानेन ८ ९ १० ११ ५ ६

क वशारदैः हरेर्भगवतःभक्त्यां विशारदैःनिपुणैः कीर्तनकरणे कुशलैर्वा कर्तृभिः १२ निशांगमयेद्दिनिशेषः १३ १४ १५

रात्रौजागरणंकुर्यात्पुराणश्रवणादिभिः कीर्तनंकारयेत्तत्रहरिभक्तिविशारदैः १२ गीतवाद्यनिर्घोषैर्नियमैस्तांम्
हानिशाम् ततःप्रभातेविमलेनद्यादौस्नानमाचरेत् १३ कृत्वानित्यविधिसर्वंब्राह्मणैरनुमोदितः वरयेत्तऋत्विजःप
चपूजयेद्वस्त्रभूषणैः होमकुर्यात्प्रयत्नेनकुंडेवास्थंडिलेपिवा पौरुषेणाथसूक्तेनइंद्रविष्णुर्हुवेद्धविः १५ शर्करासर्व
डुसहितंससर्पिस्तिलपायस विष्णोर्नुकंनिमंत्रेणानथैवाष्टोत्तरंशत १६ पूर्णाहुतिंततोहुत्वाहोमशेषंसमापयेत् ऋ
त्विग्भ्योदक्षिणांदद्याद्गावश्चबहुदुग्धदाः१७ छत्रोपानद्वदानानिदशदानानिदापयेत् स्वशक्त्याभोजयेद्विप्रान्दक्षि
णाभिःसुतोषितान् १८ तामर्चांगुरवेदद्याद्वस्त्रयुग्मेनवेष्टिताम् केशवःप्रतिगृण्हातिकेशवोवेददातिच १९ केशव
स्मारकोभाभ्याकेशवायनमोनमः इममंत्रंसमुच्चार्यदक्षिणांसहितांहरेः २० प्रतिमांविप्रवर्यायश्रोत्रियायकुटुंबिने तत
स्तुपारणंकार्यंबंधुभिःसहितंद्विजाः २१ व्रतकरोतियोलोकेदुर्लभंजगतीतले शोकमोहनिर्मुक्तोवाछितंलभतेध्रुवम्
२२ त्रयोदशाब्दपर्यंतंकारयेत्तत्सुदुर्लभम् उद्यापनंततःकार्यंसंपूर्णफलसिद्धये २३ निमंत्र्यब्राह्मणान्पूर्वंसपत्नी
कांस्त्रयोदश वस्त्रालंकरणैःपूज्यदत्वागावस्त्रयोदश सुभूषिताःसवत्साश्चमांसलाबहुदुग्धदाः २४ दक्षिणांचयथा
शक्त्याऽन्येभ्योभूरिदक्षिणां होमादिकंतुपूर्वोक्तकार्यंवित्तानुसारतः २५ वित्तशाठ्यंनकर्तव्यंपरेविष्णुव्रतेनवा
शक्त्यायत्क्रियतेकिंचित्तत्सर्वंसफलंभवेत् २६ विफलंतंद्विजानीयाद्यामिकस्यशठस्यच तस्मात्सर्वप्रयत्नेनसुभ-
क्त्यापूजयेद्धरिम् २७

होमद्रव्याण्याह शर्करेति १६ १७ छत्रंप्रसिद्धं उपानत् पादूतयोर्दानम्

१८ अर्चां प्रतिमां १९ २० द्यादिनिशेषः २१ २२ २३ २४ २५ २६ २७

इतिटीकायांसप्तमोऽध्यायः ७ ७ पुरेति भूधराधिपः पर्वतेषुश्रेष्ठः स्थावरपर्वतरूपं जंगमंमनुष्यादिरूपं १ २ ३ ४
आस्यमुखं ५ वातेन वायुनाहता रंभाकदलीव पपातेति अग्रिमश्लोकेनान्वयः ६ ७ रमयालक्ष्म्याप्रार्थितः प्रश्नकरणे प्रेरितः

इतिभविष्योत्तरेज्येष्ठमासमाहात्म्येसप्तमोऽध्यायः ७ ७ स्कंदउवाच पुराहिमवतोनामभूधरोभूद्वराधिपः स्थावरंजंगमंरूपंबिभर्तिस्वेच्छयासदा १ तस्यमार्यासुचार्वंगीमेनकानामनामतः सर्वसिद्धिसमायुक्तोप्यनपत्यः सदुःखितः २ चकारव्रतदानानिसंततिंनालभच्चिरम् ततोमेनांसमाहूयधिगिंतिप्रलपन्मुहुः ३ रूपलावण्यसंपन्ना यानारीसुतवर्जिता सानारीसर्वलोकेषुनिंदितादुर्भगेतिच ४ त्वादृक्षोममसंतापोजायतेसुचिरंसदा अद्यप्रभृति नैवास्यंदर्शनीयंशुचिस्मिते ५ कथंबभर्षिवैप्राणान्पशूनिवविनिश्चितान् इतिभर्तृवचःश्रुत्वारंभावानहनायथा ६ निपपातमहीपृष्ठेवज्राहतइवाचलः रुदतीक्रंदमानासाश्रीविष्णुशरणंयथौ ७ रमयाप्रार्थितोविष्णुर्नारदंपृष्टवान्विभुः अजस्तंप्रेषयामासमेनायाश्चसमीपतः ८ नारदेनोपदिष्टंतुपर्णाशनव्रततदा ज्येष्ठशुक्लतृतीयायांव्रतंकार्यंविधानतः ९ अदृष्टमनुजेपूर्वंयातासागिरिगह्वरम् सिंहव्याघ्रगणाकीर्णंऋक्षिणीगणसंवृतम् १० तत्र गत्वास्थितवतीस्थाणुवत्सयुतासती नचाहारंचनिद्रांचनचान्यत्कर्मकुर्वती ११ स्मरंतीमानसेमायांविष्णोर्गुणमयींसदा दैवयोगेनतत्सर्वंजातंज्येष्ठशुद्धस्करम् १३ तस्यपुण्यप्रभावेनआविर्भूताजगन्मयी तुष्टावपरयाभक्त्याचरंब्रूहीतिसाब्रवीत् १३ तवप्रसन्नोजातास्मिपर्णाशनव्रतेनसा तत्रमासोपवासेनव्रतेनपरितोषिता १४ अदेयमपिदास्यामितवभक्तिवशीकृता इतिनद्वचनंश्रुत्वाउवाचचजहर्षच १५

८ तंनारदं अजः विष्णुः ९ १० स्थाणुवत् स्तंभवत् ११ तत्सुदुष्करमपि दैवयोगेनजातंसिद्धं इतिसंबंधः १२ १३ साभगवतीमाया १४ १५

ममाङ्गजाकन्याभवेत्यन्वयः १६ १७ ननुविधानस्यज्ञानाभावान्मयाकथमेतद्व्रतंपूरणीयंतत्राह विधानमिति १८ १९ २० मासस्य॰४ ज्येष्ठ॰मा॰ अ८

मेनकोवाच यदितुष्टासिदेवेशिकन्याभवममांगना. भवाम्यहंवरंदत्वापुत्रैकस्तेभविष्यति १६ अन्यंत्वेकंहितंवच्मिनत्कुरुष्वममाज्ञया अनायासेनतेलब्धंमाहात्म्यज्येष्ठसंभवम् १७ सांगंकुरुप्रयत्नेनगच्छत्वंनिजमंदिरं विधानसकलंतेद्यभृगुरागत्यशंसति १८ इत्युक्त्वान्तर्दधेमायामेनापित्वगृहंयौ हिमाचलायतत्सर्वंभृगुणाकथितपुरा १९ भृगूपदिष्टमार्गेणमेनकापिचकारतत् हिमवानपिनज्ञात्वासंतुतोषजहर्षच मेनामालिंग्यपाणिभ्यामंकेकृत्वात्वसात्वयत् २० अथस्वल्पेनकालेनससत्वामेनकाभवत् वसिष्ठापिसमागत्यतस्याःपुंसवनक्रियां २१ चकारहिमवद्भाग्यसदृशाभुविदुर्लभा आविर्बभूवतस्याग्रेजगद्धात्रीनिजेच्छया २२ उमागौरीपार्वतीचनाम्नाविख्यातिमागता एवंज्येष्ठस्यशुक्लायांचतुर्थ्यांजनिताशिवा २३ तस्मात्सातत्रसंपूज्यास्त्रीभिःसौभाग्यवृद्धये मृन्मयंगिरिशंकृत्वाचतुर्द्वारोपशोभितम् २४ धान्यसरोहणंकार्यंसमंतादद्रिजासनात् मध्येचादोलनंकार्यं स्वशक्त्यारजतादिना २५ उमास्वर्णमयींकुर्यात्संस्थाप्यादोलनेशुभे प्रपूज्यविधिवच्छक्त्यायथाविभवसंभवैः २६ पूज्यास्तदाशुवासिन्योभोजयेच्चकुमारिकाः नानासौभाग्यद्रव्यैश्चमाल्यैश्चंदनकल्पकैः २७ गीतवादित्रनिर्घोषैर्मासमेकंसमापयेत् नित्यंहविष्यमश्नीयात्कथांश्रुत्वाप्रयत्नतः २८ उद्यापनंततःकुर्यात्फलसंपत्तिहेतवे गौरीर्भिमायेनिमंत्रेणपयसाहोममाचरेत् २९ निर्वर्त्यसकलंकर्मगांचदद्यात्पयस्विनीं गौरीव्रतमितिख्यातंस्त्रीणांसौभाग्यदायकं ३० यामोहात्कुरुतेनारीचतुर्थ्यांभोजनंयदि दुर्भगत्वमवाप्नोतिसानारीजन्मजन्मनि ३१

ससत्वागर्भिणी २१ २२ २३ ९

धान्यंसरोहणंकार्यमिति धान्यंरोपणीयमित्यर्थः २४ २५ २६ २७ २८ २९ ३० उपोषणाभावेदोषमाह मायेनि ३१

तदादि तस्माद्दिनादारभ्यइयंतिथिः उमाजयंतीतिनाम्नाविख्याता ३२ इतिटीकायांअष्टमोध्यायः ८ एतद्व्रतेइतिहासंप्रमाणयति अत्रेति १ कीर्तिपुर्यांकीर्तिसंज्ञकेपुरे २ कुलोद्भवास्कुलोत्पन्ना ३ वार्धुषिः वृद्ध्याजीवःवृद्ध्या (व्याजइतिभाषायां) आजीवःउपजीवि

उमाजयन्तीविख्यातानतदादिजगतीतले पुनश्चकारसामेनापुत्रसंतानहेतवे ३२ तेनव्रतप्रभावेनजातःपुत्रोमहौजसः मैनाकइतिविख्यातोहिमाचलइवापरः ३३ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमाहात्म्येअष्टमोऽध्यायः ८ ९ स्कंदउवाच अत्रैववर्णयिष्यामिकथांपापहराशुभाम् यस्याश्चश्रवणादेवसंशयोयोगमिष्यति १ विंध्यस्योत्तरदिग्भागेकीर्तिपूर्योहिजोत्तमः वेधाबीनामविख्यातोदेवतातिथिपूजकः२ भार्याचंद्रवतीनामगौतमस्यकुलोद्भवा पतिव्रत्यपरानारीपतिशुश्रूषणेरता ३ गृहकर्मसुसंसक्तासर्वदाप्रियभाषिणी कृषिकर्मकरोनित्यंवार्धुषीवृत्तिमाश्रयत् ४ गतेबहुविधेकालेह्यनपत्यःसदुःखितः चिंतयापरयाभक्त्यानकिंचिद्बुबुधेखिले ५ चिंतामभ्यगतस्याथरात्रयक्ष्मा बभूवह उपायानविविधान्कृत्वा मणिमंत्रौषधादिकान् ६ अथतस्यगलत्कुष्ठरोगःपरमदारुणः प्राणोनिराशतांयातो षष्ठेमासेद्विजोत्तमाः ७ तथाविधपतिंदृष्ट्वासाध्वीसासचनाबुभो निर्गतोस्वगृहात्पूर्णंगंगातीरमथापतुः ८ तुलसीनांवनंतत्रनिर्मितंस्वबलेनच पतिनासहितातत्रनिनायबहुवासरान् ९ आगतस्त्वथज्येष्ठस्तुसर्वपापप्रणाशनः तस्यानुष्ठानमात्रेणनारदःसमुपागतः १० प्रणम्यविधिवत्तंतु पूजयित्वायथाविधि निवेद्यसकलंतस्मैशोकमोहस्यकारणम् ११ नारदोपिप्रसन्नात्माहितंवचनमब्रवीत् पुराजन्मनिबालेयंब्राह्मणोज्ञानदुर्लभः १२ माहात्म्यज्येष्ठमासस्यह्यव मत्यमदोद्धतः जातोवैतेनपापेनरोगग्रस्तोनसंशयः १३

कायस्थसः वृद्ध्याजीवस्तुवार्धुषिरित्यमरः ४ ५ ६

७ ८ ९ १० तस्मैनारदाय ११ १२ अवमत्य अवमानंकृत्वा तेनकारणेन उद्भूतेनपापेन १३ ७

१४ १५ १६ १७ १८ १९ २० विसिष्मिरे विस्मयंचक्रुः अलंपर्यासंदिवसेकाले २१ २२ २३

तद्दोषपरिहारार्थंशुचिमासव्रतंकुरु गौरीनाम्नातुविख्यातंसर्वसौभाग्यदायकम् १४ तथेत्युक्त्वाविशालाक्षीपू
जयामासतंविभुं मुनौगतेतुरुक्मांगीचकारपतिनासह १५ नारदादिष्टमार्गेणभक्तियुक्तेनचेतसा तस्यानुष्ठान-
मात्रेणमेधावीब्राह्मणोत्तमः १६ शनैःशनैःसमुक्तोभूत्तस्माद्रोगाद्द्विजोत्तमाः उद्यापनंचकारार्थपूजनंद्विजतर्पणम्
१७ ददौधनानिविप्रेभ्योगोधनानिबहून्यपि भोजयेद्बहुशोविप्रान्पक्वान्नैःपायसैरपि १८ स्वयंचपारणंचक्रेपत्न्या
चसहबांधवैः ततःस्वगृहमायातोबंधुभिःपरिचारितः १९ महोत्सवःकृतःसर्वैस्तत्तदापुरवासिभिः वृत्तांतःकथि
तस्तेषांपृच्छतांपुरवासिनां २० विसिष्मिरेतदासर्वेमाहात्म्यश्रवणाद्बलम् अन्यस्मिन्दिवसेतुपुत्रार्थंचमचक्रतुः
२१ तस्यप्रभावात्सजातोपुत्रःकामदेवापरः जातकर्मचकाराशुद्दौ वाश्वसहस्रशः २२ धनवस्त्रान्यलंकारान्वि
प्रेभ्योऽप्यधिकंददौ विस्मृत्यास्तद्व्रतंचक्रुस्ततस्तेपुरवासिनः २३ सर्वेपिस्कस्विनोजाताआधिव्याधिविवर्जिताः न
दादिपरमाख्यानिग्रामलोकेमहद्व्रतम् २४ शिवायैकथितपूर्वंशिवेनप्रभविष्णुना संक्षेपेणमयाख्यातरहस्यंवरमु
त्तमम् २५ स्कंदस्यवचनंश्रुत्वाऋषयःप्रीतमानसाः पुण्यदृष्टिंचक्रुरुच्चैर्जीवजीवेतिचाब्रुवन् २६ स्तुत्वैवंगिरिजा
पुत्रंसंपूज्यचपृथक्पृथक् पुनरूचुस्तपोनिष्ठामियस्तेहर्षपूरिताः २७ अहान्युतानिमासानामाहात्म्यानिबहून्य-
पि ज्येष्ठस्यवासरस्यैकनिधिस्तत्तुलनाव्रजेत् २८ विचित्येवंततःसर्वेज्येष्ठस्नानार्चनक्रियाम् चक्रुःसर्वप्रयत्नेनय-
थाविभवसंभवैः २९ इतिभविष्योत्तरपु०ज्येष्ठमाहात्म्येनवमोऽध्यायः ९



२४ प्रभविष्णुना प्रभवशीलेन २५ २६ २७ २८ २९ इतिटीकायांनवमोऽध्यायः ९ ६२

मासेइति विष्णुनिलये विष्णुस्थाने विष्णुप्रियेइतियावत् १ २ ३ ४ पापानिलक्षयति अदत्तानामिति त्रिभिः तत्रानेन श्लोकेनकायिकपापस्यलक्षणमुक्तं अदत्तानांअन्येन तवेदमित्यप्रतिश्रुतानां उपादानंग्रहणं चौर्यमित्यर्थः अविधानतः यज्ञादियज्ञकर्माभावेवि

स्कंदउवाच मासेस्मिन्विष्णुनिलयेकार्यंदशहराव्रतं स्नानंभागीरथीतोयेकार्यंप्रतिपदादिषु १ ऋषयऊचुः कथं दशहरानामस्नानप्रतिदिनेकृतः कस्माज्ज्येष्ठेचकर्तव्यंतत्सर्वंविस्तराद्वद २ स्कंदउवाच ज्येष्ठमासिसितेपक्षेदशम्यां बुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ ३ दशयोगेनरःस्नात्वासर्वपापैःप्रमुच्यते भुक्त्वाचविविधान्भोगान्नरं तेहरिपुरंव्रजेत् ४ अदत्तानामुपादानंहिंसाचैवाविधानतः परदारोपसेवाचकायिकंत्रिविधंस्मृतम् ५ पारुष्यमनृतंचैव पैशून्यंचापिसर्वशः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं ६ परद्रव्येष्वभिध्यानमनसानिष्टचिंतनम् वितथाभिनिवेशश्चमानसंत्रिविधंस्मृतं ७ एतानिदशपापानिहरतेदशनादिभिः तस्माद्दशहराप्रोक्तामुनिभिःपूर्वदर्शिभिः ८ दशजन्मार्जितैःपापैर्ब्रह्महत्यासमैरपि हरतिस्नानमात्रेणतस्माद्दशहरास्मृता ९ गंगांसंपूज्ययत्नेनमंत्रैरेतैःपुरातनैः नमःशिवायैशांतायैनारायण्यैनमोनमः १० दशपापहरायैचगंगायैतेनमोनमः तत्रैवपूजयेद्देवान्दशसंख्यान्मनोजसः ११ नारायणमहेशंचब्रह्माणंभास्करंतथा भागीरथींहिमवंतस्कंदंचगणनायकम् १२ तथाचंडींचसोमं चपूजयित्वास्वशक्तितः फलैश्चदशसंख्यैरर्घ्यान्दत्वापृथक्पृथक् १३ दशदीपांस्ततोदत्वातिलांश्चदशप्रसृतीः गंगायैसर्वरूपिण्यैमंत्रेणानेनचार्पयेत् १४ तथैवदशसंख्याकान्सक्तुपिंडान्जलेक्षिपेत् गुडपिंडान्ततःक्षिप्त्वादशसंख्यान्स्वशक्तितः १५

व्हानृत्यर्थं हिंसा परदारोपसेवा परस्त्रीगमनं ५ वाचिकंपापमाह पारुष्यमिति पारुष्यंकठोरभाषणं अनृतं असत्यभाषणं पैशून्यं सूचकता ६ मानसपापमाह परद्रव्येष्विति स्पष्टं ७ ८ ९ १० ११ १२ १३ १४ १५

मच्छकच्छपमंडूकशिंशुमारादिकोस्तनः कृत्वास्वर्णमयान्शक्त्याराजतानन्यधातुजान् १६ यद्वापिष्टमयान्कृत्वासम्
भ्यर्च्यजलेक्षिपेत् ततोदशप्रस्थमितान्तिलान्व्रीहियवानस्थितान् १७ गावश्चदशसंख्याकाब्राह्मणेभ्योयथाविधि दव
कृत्वाविधानेनवित्तशाठ्यंविवर्जितः १८ तथैवभोजयेद्विप्रान्पक्वान्नैःपायसेरपि दशजन्मार्जितैःपापैर्मुच्यतेनात्रसंशयः
१९ ज्येष्ठमासिसितेपक्षेप्राप्यप्रतिपदातिथिं दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपातकैः २० एवसर्वासुतिथिषुकृत्वस्ना
यीनरोत्तमः अशून्यशयनव्रतीदशमीप्रतिजन्माघनाशिनी २१ लिंगदशाश्वमेधस्यहब्रह्मादशहरानियो दशजन्मार्जितंपापं
मुच्यतेनात्रसंशयः २२ दशयोगाइतिख्यातादशविद्वैर्युतैर्युतः लभ्यतेवानवातत्रज्येष्ठएकोमहत्तरः २३ केवलेपितथा
ज्येष्ठेसर्वयोगविवर्जिते सर्वंनहन्तिजानीहिफलंपूर्णमनोरथं २४ यथाक्षोडुगणैःसार्द्धंशोभतेसौनिशाकरः तथैवयोग-
संपन्नोज्येष्ठोभामिनितत्तनः एतेशुक्लविनायोगाविफलास्युर्नसंशयः २५ इतिभविष्योत्तरपुं०ज्येष्ठमाहात्म्ये
दशमोऽध्यायः १० अ ऋषयऊचुः सर्वेयोगाःसमाप्रोक्ताःपुण्यदाःपापहारिणः श्रेष्ठस्तेषांकथंज्येष्ठःक
थयस्वविधानतः १ स्कंदउवाच ज्येष्ठमासिसितेपक्षेदशमीहस्तसंयुता। तस्यांस्वर्गावतीर्णेयंजान्हवीलोकविश्रु
ता२ भगीरथस्यतपसानीतापापविनाशिनी अतःसर्वोत्तमोज्येष्ठोयोगाःसह्यरामताः ३ ऋषिरूवाच कस्मा
द्भगीरथोराजाचकारतपउत्तमम् आनीताजान्हवीकस्मात्कुत्रपूर्वंस्थितासती ४



शमोध्यायः १० अ सर्वेषुमाहात्म्येषुतत्तत्प्रतिपाद्यंवस्तुश्रेष्ठंप्रतिपाद्यतेतथैवेदमस्ति उतएतस्यश्रैष्ठ्येकिंचित्कारणांतरम-
स्तीतिपृच्छंति सर्वेइति १ ज्येष्ठस्यश्रेष्ठत्वेकारणांतरमाह ज्येष्ठमासीति २ ३ ४ ५ ६

विकलुषान् निष्पापान् ५ ६ ७ अमरूपिणी उदकरूपिणी ८ ९ १० ११ १२ १३

स्कंद उवाच विष्णोर्नाभिसरोरुहात्कमलभूर्जातोयदानिर्मितुंब्रह्मांडंसकलंकमंडलुधरोवेदांस्तथाचापरैः ह-
स्ताब्जैर्भुवनत्रयविकलुषंकर्तुंतथापावनतत्पादाब्जतदेवविश्वजननीगंगानदापावनी ५ कमंडलुसमुद्भूताब्रह्म
णासहशार्ङ्गिणी नचैवोह्यादितातेनवत्सरैर्बहुभिस्तदा ६ कदाचित्समयेदैत्यैःप्लावितभुवनत्रयम् तदासंद्रादि
देवैस्तुपूजितोमधुसूदनः ७ कमंडलुस्थितैस्तोयैःस्नापयामासतंहरिम् ततस्तच्चरणाब्जाभ्यिःस्नानाच्चाबुरू-
पिणी ८ साधुताशुभनातूर्णंनद्यावृष्टिगोचरा कृत्वाजटानांस्फटंमालवालंतपोधनाः ९ ह्रिरूपनासमभवद्गं-
गायाःशिवयोगतः ततःसुदेवनाथैःप्रार्थितोवृषभध्वजः १० मुक्तवान्स्वजटाभारात्चरानद्याःस्वरूपिणी
सास्वर्धुनीसमाख्यातास्वर्गगास्वर्गवासिनी ११ ततोभगीरथोराजानपस्तप्त्वास्फटारुणम् आनयामासभूलो
केपितॄणांमुक्तिहेतवे १२ तत्रशेषादिभिःस्तुत्वानीतापातालगह्वरम् भगीरथेनसानीतातोभागीरथीस्मृता
१३ ततःपीताज्जह्वराज्ञामुक्ताश्रोत्रात्तुदक्षिणात् तत्रसाजाह्नवीजाताधिख्याताजगतीतले १४ यतस्त्रिलोके
वहनिपातिलोकत्रयान्स्वय अतस्त्रिपथगेत्येवनामाभूज्जगतीतले १५ कमंडलुसमुद्भूताविष्णुपादसमुद्भवा
गंगाहरजटोद्भूतास्वर्धुनीलोकपावनी १६ भागीरथीजाह्नवीतित्रिस्रोताभीष्मसूरपि मंदाकिनीभोगवतीतथा
त्रैलोक्यवासिनी १७ एवंनामानिबहुशःशतान्यसहस्रशः तत्राप्येतानिमुख्यानिगदितानित्रयोदश १८
त्रयोदशैवनामानियेपठंतिदिवानिशम् तेषांभागीरथीतीरेवासएवनसंशयः १९

जान्हवीनिनाम्नःकारणमाह ततइति

१४ १५ १६ १७ १८ एतन्नामपाठस्यफलमाह त्रयोदशेति १९ ७ ७

स्नानकालेपठेन्नित्यंगंगास्नानफलंलभेत् णभिर्नामपदैर्नित्यंनमस्कारंप्रकुर्वते २० नेसर्वेपापनिर्मुक्तायांत्यंतेशिव सन्निधौ २१ प्रयाणकालेमनसाचलेननामैरमूभिः प्रजपंनिमानवाः तेस्वर्गलोकंसमतीत्ययांतिपरमंधानपरमस्य पुंसः २२ णभिस्त्र्यानामपदैर्जलानिसमभ्यसिंचंतितथावसाने तानर्कसूनोर्नभयंकथंचित्नकिल्बिषंदुःखलेशो पिनूनम् २३ अहोमाहात्म्यंगंगायाःकईशःकथनेप्यलम् वक्तुंयवदनंचेत्स्यामशकाइवचापरे २४ इतिभविष्यो त्तरपु०ज्येष्ठमाहात्म्येएकादशोऽध्यायः ११ ऋ स्कंदउवाच अधुनाकथयिष्यामिगंगायाश्चकथानक राज्ञाभगीरथेनापिआनीतायस्यहेतवे १ शृणुष्वतत्समग्रंवैकृत्वाग्रेतत्कनिश्चिलम् पुरारविकुलश्रेष्ठोराजापरम् धार्मिकः २ नीतिज्ञःशास्त्रकुशलःशास्ताशक्रःपुरीमिव औरसानिवपुत्राश्चमातेवसकलंजगत् ४ शतपुत्रैश्चयुक्तो भूत्फणाभिरिवभूधरः सगराइतिविख्याताःसर्वेसमपराक्रमाः ५ बलेनमरुतातुल्याबुद्ध्यावाचस्पति समाः शरासनेभीष्मनिभा स्तेजसाभास्करोपमाः ६ सर्वविद्यास्कुशलास्तथाधर्मपरायणाः तैरन्वितोनृपवरं आरेभेस क्रमुत्तमम् ७ अश्वमेधेनिविख्यातंवसिष्ठेनसहायवान् सकल्पविधिवत्कृत्वाउत्ससर्जसवाजिनं ८ अनर्गलंच-भूषाभिर्बहुभिःपरिशोभितम् अन्यैःसेनाचरैर्वीरैःस्वपुत्रैःपरिवारितम् ९ देशाद्देशानरंगत्वाश्चमाणोनिजेच्छ या यैर्यैराजभिर्विख्यातैर्धृतोसौवाजिनांवरः १० तान्विजित्यस्ववीर्येणमोचिताःशरणागताः एवसर्वेपिराजानोवासु धातलवासिनः ११

अधुनेति १ २ ३ ४ भूधरःशेषः फणाभिःयथायुक्तः तथाअयंपुत्रैर्युक्तः ५ ६ ७ ८ अन्वंवर्णयति अनर्गलमिति नास्तिअर्गलाप्रतिबंधोयस्यतं ९ १० ११ ऋ

१२ १३ १४ शतमन्युः इंद्रः १५ १६ १७ १८ क्रोधमस्फुरिताधरः क्रोधेनप्रस्फुरितः कंपितः अधरः

करभारभरैः कांतारासभोष्ट्राश्ववाजिनः गजाश्वशकराश्चापिन्ययोध्यायांसमाययुः १२ समाप्यविधिवद्यज्ञंकल्विभ्योदक्षिणांददौ आनीयदशदिग्भिश्चद्रव्यजातंसराष्ट्रजम् १३ सर्वेभ्योविप्रमुख्येभ्योददौकामविवर्जितः एवंक्रतुशतंजज्ञेएकेनरहितंयदा १४ तदेवचकितोजानः शतमन्युर्दिवस्पतिः किंकरोमिकगच्छामित्रातामांभवतीहकः १५ एवंसंचिंत्यमनसायुद्धायप्रययौतदा देवसैन्यैःपरिवृतोभुवंयातःक्षणार्द्धतः १६ सागरैःसहसादृष्टोदेवानामधिपःस्वयम् उद्युक्तान्स्वहरणेआगतास्तेतदंतिकम् १७ नमस्कृत्यसमंवाक्यंऊचुस्तेसगरात्मजाः किमर्थमागतःस्वामिन्निजलोकाच्छचीपते १८ एवंतेषांवचःश्रुत्वाक्रोधप्रस्फुरिताधरः इंद्रउवाच पदंहर्तुसमुद्युक्ताशाश्वतंममसांप्रतम् १९ चंचकाइवभाषंतोमधुरंपरमंवचः उक्तास्तेसहसादेवाज्जघ्नुःपरमसायकान् २० ततःप्रवृत्तंतुमूलंयुद्धंसर्वभयप्रदम् बाणैर्बाणान्स्यावीरान्शस्त्रैरस्त्रान्यवारयन् २१ ध्वांतंतत्राभवद्घोरंबाणैर्व्योमादिशोदश नबोधःस्वात्मपरयोर्निजघ्नुःसर्वएवते २२ देवा देवान्हनिष्यंतिसागरान्सगरात्मजाः : एवंनबुबुधेतत्रस्वकीयमथवापरम् २३ देवबाणभयत्रस्तायदासागरवाहिनी यातादशदिशंप्राणान्रक्षितुंद्विजपुंगवाः २४ सागराःकोपसंतप्तादिनिजास्त्रमयोजयन् तद्भयाद्देवनाशंदंपलायनपरंभवन् २५ इंद्रैकोगजमारूढोसागरास्तेसहस्रशः नेभ्योयोद्धुमशक्तोभूत्पलायनपरोभवन् २६ चिंतयापरयाव्याप्तोवासवदेवमथाययौ देवराजेगतेयुद्धात्सगरात्मजसैनिकाः २७ समाजग्मुर्निवेशायस्वामिनोगौरवावलम् दत्वातेषांसबहूनिवस्त्राण्याभरणानिच २८

अधरोष्ठोयस्यस १९ परमसायकान् तीक्ष्णबाणान् २० २१ ध्वांतं अंधकारः २२ हनिष्यंतीत्यत्रजघ्नुरित्यर्थः २३ सागरवाहिनीसगरसेना २४ दिनिजास्त्रं दैत्यास्त्रं अर्द्धभावश्चार्षः २५ २६ २७ निवेशायशिविराय २८

इतिदीकायाद्वादशोऽध्यायः १२ ७ निवेद्येतिइद्रःकथयामासेत्यर्थः भावितंकरणीयं ध्यात्वाविचार्य वासुदेवइतिशेषः १ ईशःसमर्थः २
अधुनाकरणीयमुपायमाह इमांमितिविधिः ३ ४ ५ ६ आद्यंविष्णुं अपृच्छदितिशेषः प्रश्नमेवाह कुत्रास्तिइति ७

इतिश्रीभविष्योत्तरपु ज्येष्ठमाहात्म्येद्वादशोऽध्यायः १२ ७ स्कंदउवाच निवेद्यवासुदेवायसर्वसागरचेष्टितं भावितंमनसाध्यात्वाइदंवचनमब्रवीत् १ श्रीभगवानुवाच अहमेवशिवोवापियोद्धुंनेशक्नुतैःसह अतस्तेकथयिष्यामितत्कुरुष्वयथामति २ इमामदृश्यकरणींविद्यांदास्यामिसुव्रत तांगृहीत्वापुनर्यांहिएकोहिनिर्भयःशुचिः ३ तांजपस्वविधानेनअश्वंधृत्वाप्रयत्नतः कपिलस्यानेकंगच्छतथैवमनसास्थितम् ४ तत्रैवस्थापयित्वातंहयराजंशुभावहम् ततोगच्छनिजंसद्मस्वकार्यंकुरुपूर्ववत् ५ नोचेत्वांतेहनिष्यंतिमयासहनसंशयः इतिवाक्यंभगवतः श्रुत्वास्नात्वाविधानतः ६ अदृश्यकरणींविद्यांजग्राहमधुसूदनात् प्रणम्याद्यपुनर्यातः कुत्रास्तेकपिलोमुनिः ७ श्रीभगवानुवाच कलिंगपूर्वदिग्भागेवसुधायांगुहांतरे निर्मितंभूरिहेनेनपातालसदृशंमहत् ८ तत्रास्तेध्यानसंपन्नोकपिलोयमिनांवरः श्रुत्वैवंभगवद्वाक्यंइंद्रोभ्यागाद्धयांतिकम् ९ जपन्भगवतोदिष्टांविद्यासत्रृषिदेवताम् गृहीत्वाप्रययौतूर्णंनकोपिबुबुधेतदा १० इंद्रोपिकपिलंदृष्ट्वाएकांतेध्यानसंस्थितः प्रणम्यविधिवत्तत्र बध्वातंहयसत्तमम् ११ इंद्रोपिनगरंप्राप्यचेतसाशंकितोभृशम् गनेहयपतौतत्रमीलिताक्षरक्षकाः १२ नृपंनिवेदयामासुःसर्वज्ञानविमोहिताः क्वगतोकेननीतोवानविद्मोवस्वधापते १३ तेषांतद्वचनंश्रुत्वानतःसगरनंदनाः गतास्तेदशदिग्भागेद्रष्टुंहयपतिंद्विजाः १४

कलिंगेति कलिंगो कलिंगदेशः तत्पूर्वभागे ८ ९ १० ११ शंकितः अग्रेकिं भविष्यति यत्कृत्यं कृतं तत्सुखं परिणाम्युतदुःखपरिणामिस्यादेतद्विषयेजातशंकः १२ १३ १४ ७

प्रतिग्रहमवलोकने कारणमाह संशयाकुलचित्तैरिति अयंपूर्वयज्ञविघ्नार्थमस्माभिरुपध्यनतः अनेनैवप्राप्योश्वस्थापितः इतिसंशयेनाकु
लानिचित्तानियेषांतैः १५ १६ १७ १८ अंतःपुरादीनिंददृशुरितिशेषः १९ भूविदारणेकः प्रेरितवान्तत्राह का

सर्वमहीतलंदक्षाद्भक्ष्यंस्वर्लोकमाययुः नक्षत्रंलोकमासाद्यमेंद्रंपुरमथाविशन् १५ संशयाकुलचित्तैस्तैर्दृष्टंप्रतिगृह्यतनः एवमिंद्रस्यचा
न्येषांतथैवांतःपुराणिच १६ प्रासादान्सर्वशालांश्चवनान्युपवनानिच दिक्पालानांतथालोकान्ब्रह्मलोकमतःपरं १७ कैलास
हिमवंतंचतथान्यान्पर्वतान्बहून् मेरोश्चापिगुहाःसर्वाः शिखराणिचसर्वशः १८ गंधर्वयक्षलोकंचविष्णुलोकमतःपरम् एवस
र्वंसमाक्रांतालोकाःसगरनंदनैः १९ नापश्यतोहयंतत्रततःपातालमाययुः पातालान्नितःसप्तदृष्ट्वैवाशिबिरंययुः
२० ततस्तेदुःखिनाःसर्वेत्यक्तुंप्राणान्समुद्यताः भुवंविदारयामासुस्तेसर्वेकालचोदिताः २१ अकस्माद्विवरलग्नश
तयोजनविस्तृतम् महेंद्रालयसंकाशंमानवैःपरिवर्जितम् २२ दृष्ट्वातेगह्वरंदिव्यंविविशुश्चसहस्रशः ददृशुस्तेह
यवरंबद्धंकनकदामभिः २३ ततःकपिलनामानमृषिंध्यानपरायणम् मनसासृष्टिसंहारशापानुग्रहकारिणं २४
अविज्ञातप्रभावैस्तैर्दस्युमत्वाविचक्षणैः अनेनैवहृतोस्वोयंध्यानस्थोभूद्ध्रुवंकिल २५ मद्ध्याद्भूगृह्यकृत्वाऋषिवद्ध
श्यतेखलः एवंचध्यानयत्नेननेष्यामोनृपसन्निधिम् २६ एवमुक्तातुतैःसर्वैःकृतःकोलाहलोमहान् बध्यातकपिल
जूटेनाडयामासुरेवते २७ ध्यानंविसृज्यसमुनिर्यावत्सदृदृशेखिलान् तावच्चाग्निनादग्धाजाताःसगरनंदनाः २८
इतिश्रीभविष्योत्तरपु ज्येष्ठमासमाहात्म्येत्रयोदशोऽध्यायः १३ ७ ऋषयऊचुः सर्वाभस्मत्वमापन्नासगरस्य-
वसंततिः आरब्धयज्ञोनृपतिः किंवकारषडानन १

लचोदिताः २० २१ २२ २३ कपिलसामर्थ्यं वर्णयति-

मनसेति २४ २५ २६ २७ २८ इतिज्येष्ठमाहात्म्यटीकायांत्रयोदशोऽध्यायः १३ ७ १

२ ३ ४ लग्नंखननेनहेतुनाग्राममित्यर्थः ५ बिलधरः बिलस्वामीतैर्नोत्थापितः नम्रबोधितः ६ ७ ८

सैनिकाश्चापिकिंचकुस्तत्सर्वंरुपयावद् स्कंदउवाच बिलद्वारस्थितायेचसैनिकाभयविप्लुताः २ बिलाग्निज्वाल यानमानृपंयानानिवेदितुम् सर्वंतेकथयामासुस्त्रैलोक्यविजयादिकम् ३ यदानदृष्टंकुत्रापिहयरत्नंनवात्मजैः नः दैवरक्षनिताचोर्वीतस्यसर्वस्यबाहुभिः ४ तत्रैवविवरंलग्नंशतयोजनविस्तृतम् तत्रप्रविशस्तेसर्वेबहुभिःसैनिकैः सह ५ नोत्थापितोबिलधरोगतास्तेबहुवासरं तत्रतैःकिंकृतंराजन्नविद्योद्वारसंस्थिताः ६ अकस्माद्वह्निना- व्याप्तंबिलंघ्रातालसन्निभम् वपंतज्ज्वालयाव्याप्ताभीतायातानिवेदितुम् ७ कथंतेषांगतिर्जातानजानीमोविमोहिताः इतितद्वचनंश्रुत्वावज्राहतइवाचलः ८ शोकेनपतितोभूमौनिश्चेष्टइवतत्क्षणात् अमात्याऋत्विजाःसर्वेहाहाकारं प्रचक्रमुः ९ उत्थापयित्वानृपतिंवारिभिश्चमुखांबुजम् सिसिंचुःकृच्छ्रतश्चक्रुस्तेऋत्विगादयः १० माशोचनृपशार्दूलसर्वभूतहितेरत शोकंनैवप्रकुर्वंतिपुरुषावीर्यशालिनः ११ भवान्वयंचवीराश्चगच्छामस्तद्बिलांतरे एवंविनिश्चयंकृत्वायागशेषसमाप्यच १२ सर्वेविनिर्गताद्रष्टुंतद्बलंतत्पराक्रमम् मार्गंतेदर्शयामासुर्देवैरपिसुदुष्करम् १३ चक्रुधायास्तलसर्वेखानंतत्कुहरावधि ब्रूमोऋषिगणाःसर्वेविद्धिभावनसाधिप· १४ इतोगतास्तविस्तीर्णाभविष्यंतिहि सागराः एवंविवदमानास्तेआगताःकुहरांतिकम् १५ बलंतत्रैवसंस्थाप्यऋषिभिःसहधर्मवित् प्रयनःप्रययौराजाभूय हेपरमाद्भुते १६ तदिंद्रभुवनाकारंरत्नदीपैःसुदीपितम् भूतसंचाररहितंभस्मराशिचयावृतम् १७ पश्यन्पश्यन्शनैर्यातस्तस्यर्षेरंतिकंद्विजाः तंदृष्ट्वानेजसाव्याप्तंज्वलंतमिवपावकम् १८

९ १० ११ १२ दर्शयामासुःददृशु

रित्यर्थः १३ तत्कुहरावधितद्बिलावधि कुहरं शुषिरंविवरंबिलमित्यमरः १४ १५ १६ १७ १८

जटिलंपरमात्मानंध्यायंतंयोगगोचरम् कपिलेतिचिराद्ध्यानत्वास्तोतुंप्रचक्रमे १९ राजोवाच जयनित्यपरानंदजगद्योनिस्वरूपिणे मनसास्रष्टिसंहारकारिणेतेनमोनमः २० नमःसत्वगुणाविष्टहरिरूपायतेनमः रजोगुणवेतुभ्यंब्रह्मरूपायतेनमः २१ तथातमःस्वरूपायशिवरूपायवैनमः नमोनमस्तेऽखिललोकवंद्यसुरासुरैरर्चितपादपद्म दयानिधेपाहिभवाब्धिमग्नंक्षिप्त्वमामुद्धरभूसुरेंद्र २२ शोकांबुराशौपतितंविशालागाधेनथातीरविवर्जितेच मह्यिवमामुद्धरदीनबंधोयतस्त्वमेवादिवराहरूपी २३ स्तुत्वैवंसगरोराजापुनः शोकसमावृतः पपातावलवद्भूमौवर्षाकालेनडिंडथा २४ कपिलोपिचतज्ज्ञात्वाचक्षुरुन्मील्यनिश्चितम् नृपंचार्षिगणान्दृष्ट्वाइदंवचनमब्रवीत् २५ इतिश्रीभविष्योत्तरपु०ज्येष्ठमाहात्म्येचतुर्दशोऽध्यायः १४ ७ कपिलउवाच केयूयंकुतआयाताकिमर्थंममसन्निधौ तेऊचुः भगवन्सगरोनामनृपःपरमधार्मिकः १ तवाग्रेपतितश्चायंशोकदुःखसमावृतः शृणुष्वकारणंतस्यज्ञातमस्त्यखिलंतव २ राज्ञाकृताहयमखामहेंद्रोपिजितोरणे पुत्रैःषष्टिसहस्रैश्चबलिभिः परिवारितः ३ आरब्धेऽथोशतमखेहयंपुत्रशतैर्वृतम् बहुभिःसैनिकैःसार्द्धंमुमोचजगतीतले ४ भ्रममाणेहयेऽकस्मादंतर्द्धानंजगामसः गृहेहयपतौचीरादृष्ट्वात्रैलोक्यमाखिलम् ५ उर्वीतलंतदाख्यातंसकलंकुहरावधि ततस्तेविवरेलग्नेनत्रयातास्तुसर्वशः ६ अग्निमनैवजानीमोवृत्तांतमृषिसत्तम तेषामन्वेषणार्थायवयंयातास्ततोंतिकं ७ तज्ज्ञात्वाकपिलःप्राहज्ञात्वासर्वंसमाधिना शक्रेणेदंकृतंकर्मगूढचर्यांगितेनच ८

बलिभिः बलवद्भिरैः शूरैरित्यर्थः ३ ४
आखिलंएतद्बिलपर्यंतं सर्वंत्रैलोक्यंदृष्टं ५ ६ ७ गूढचर्यांगितेन गूढाचर्या शरीरव्यापारः इंगितं मनोव्यापारश्च यस्यतेन ८ ७

९ १० ११ १२ १३ आप्नोति प्राप्स्यति वर्तमानसामीप्ये वर्तमानवद्वा १४ ससत्या साध्वीपतिव्रता १५

मदग्रेस्थापितश्चाश्वः शक्रःस्वभुवमागतः राजानोराजमुख्याश्चसमस्ताहयरक्षकाः ९ दस्युंमामन्यमानास्तेपीडयामासुरन्वहम् ततःक्रोधाग्निनादग्धानमयाबुद्धिपूर्वकम् १० एवमुक्त्वाऋषिवरोक्रोशंतंनराधिपं उत्थापयित्वास्वकरैस्तं परिमार्ज्यमुखांबुजम् ११ उवाचमधुरंवाक्यमाभैषीर्नृपसिंहेह्यतोत्तमाः गच्छत्वंनिजराज्यंपूर्णस्तवशतक्रतुः १२ भविष्यसिमहेंद्रस्त्वंनिश्चितंमदनुग्रहात् इंद्रस्यदुष्टबुद्धित्वादहल्यायांमतिर्भवेत् १३ गौतमाच्छापमाप्नोतिभविष्यतिभगांकितः इतिदत्वावरंतस्यशापंचापिशतक्रतौ १४ पुनरप्याहनृपतिंनतेचैवानयःप्रिय नवज्येष्ठस्यपुत्रस्यससत्यास्याद्वरांगना १५ तस्याःपुत्रोभवेन्नूनंशूरःसत्यपराक्रमः भगीरथेतिविख्यातोसवित्कुलभूषणः १६ शस्त्रास्त्रविद्याकुशलोनीतिज्ञःसत्यवान्शुचिः जित्वावसुमतींपूर्णांदुष्करंतपआचरेत् १७ प्रभावात्तस्यतपसःप्रागमिष्यतिजाह्नवी स्वर्गलोकाद्देवसरित्पितॄणांतारणायच १८ तस्याःवुकणिकास्पर्शाद्दिव्यदेहाभवंतिहि त्वयासहगमिष्यंतिचैकुंठंविष्णुमंदिरम् १९ यतोभगीरथेनासावानीतावसुधातले भागीरथीतिविख्याताभिलितापरमाबुधौ २० इतिश्रुत्वागिरंतस्यकपिलस्यमहात्मनः ऋत्विग्भिःसहितंपूज्यनमस्कृत्यायय़ौपुरम् २१ ततःकष्टेनबहुनानीयमानेदिनेसति अथैकस्मिन्सदिवसेप्रसूतासुभगासती २२ पुत्रंबहुगुणोपेतंजयंतमिवचापरम् वसिष्ठेनसमागम्यजातकर्मादिचाकरोत् २३ दत्वादानानिबहुशोगोदानानिबहूनिच तथान्येभ्योहिजेभ्यश्चवस्त्राणिचधनानिच २४ भगीरथेतिनामचकारद्वादशेहनि दिनेदिनेश्चवर्द्धेशुक्लपक्षेयथाशशी २५

१६ १७ १८ १९ २० १५

पूज्य पूजयित्वा त्यब्ब्रह्मर्षिः २१ २२ २३ २४ २५ ५ ५

२६ अरिक्तेष्वंपूर्णेषु शास्त्रेष्वित्याध्याहारः २७ २८ २९ ३० इतिज्येष्ठमाहात्म्यटीकायांपंचदशोऽध्यायः १५ ध्रं
अथभगीरथतपश्चर्यांसकारणांप्रस्तौति ततइति १ २ ३ दशवर्षाणिएकपादेननिष्ठनातोयाहारवनावायाहारचतेत्यत्रापि

ततश्चकारविधिवच्चौलोपनयनक्रियाः वाजीगजरथादीनांविद्याभ्यसनतत्परः २६ कलानामपिसर्वासांकुशलोभूत्पृ
थात्मजः एवंषोडशवर्षावैकृजातःपूर्णेरिवलेष्वपि २७ दृष्ट्वासर्वगुणैःपूर्णराज्यधुर्यमहौजसम् मंत्रिभिःसहसंगम्य
ददौराज्यस्रुजन्मने २८ ततःपैतामहराज्यंलब्ध्वासचभगीरथः पुत्रवत्सालयामाससकलंधरणीतलम् २९ ततः
ससगरोराजानिर्वृत्तिंपरमांययौ ३० इतिश्रीभविष्योत्तरपु०ज्येष्ठमासमाहात्म्येपंचदशोऽध्यायः १५ ध्रं
स्कंद उवाच ततोभगीरथोराजाकृत्वाराज्यमकंटकम् वृत्तश्चृण्वन्स्वपितृणामुदासीनोबभूवह १ राज्यदंड्य
कोशंचस्थापयित्वापितामहे गृहीत्वाज्ञांययौशीघ्रंतपस्तप्तुंस्कंदारुणम् २ शिवमुद्दिश्यतपसानिराहारेणनि
ष्ठता विद्यांपंचाक्षरीनामजपनास्थिरचेतसा ३ निष्ठतावैकपादेनदशवर्षाण्यहर्निशम् तोयाहारवतानहत्
वायोराहारकृत्तथा ४ एवंकृत्वातदातेननीतःकालोयदामद्रान् तदैवस्वयमायातःसशिवोभक्तवत्सलः ५ वरं
दातुसमायातस्तस्यभक्त्यावशीकृतः शिवंदृष्ट्वाप्रणम्योच्चैर्मधुरंवाक्यमब्रवीत् ६ भगीरथउवाच शिव
शंभोनमस्तुभ्यंसर्वेषांसुखदायक नमस्तेजगतांनाथविश्वकर्त्रेनमोस्तुते ७ रजोयुक्त स्वरूपायपालकायनमो
नमः सत्वात्मनेचसंहर्त्रेतामसायनमोनमः ८ कर्मणांफलदात्रेचभुक्तिमुक्तिप्रदायव मनोवाक्गतिरूपायब्र
ह्मीभूतायतेनमः ९ अनर्वायुनिरुद्धानांयोगिनांध्यानशालिने निरीहदत्तमोक्षायतस्मैमामिसदाशिवम् १०

दशवर्षाण्यत्यनुसंधनायं ४ ५ ६ ७ ८ ९ निरीहाय निस्पृहाय दत्तोमोक्षोयेन तस्मै १० ध्रं

११ १२ १३ प्रसन्नः शिवः गंगानयनकार्यं संसिद्धेवनमुपदिशति नदिनि १४ १५ १६ १७ १८



शिवउवाच श्रुत्वैवंवरयामासप्रसन्नोहंपुनर्नृप नृपउवाच तुष्टश्चशिवमत्यंतंभक्तिंदेहिदृढांनव ११ पितृणांचविशुद्ध्यर्थंत्वंगंगानयनंकुरु शिवउवाच स्वर्गेतिष्ठतिसागंगानाहमानयितुंक्षमः १२ प्रसन्नंकुरुदेवेशंविष्णुंत्रैलोक्यवंदितम् येनोपायेनतेक्षिप्रंविष्णुःसान्निध्यमेष्यति १३ तदहंतेप्रवक्ष्यामिव्रतंपरमगोपनम् पुरारविस्कृतोविष्णुस्कृत्वानत्वाप्रसाद्यतं १४ कृत्वाप्रसन्नंतद्वोप्यंक्रियतामित्ययाचयत् तथेत्युक्त्वाभगवतागोपितंबहुवासरम् १५ तदद्यतेप्रवक्ष्यामितत्कुरुष्वविधानतः ज्येष्ठमासिसमुत्थायस्नात्वाप्रातर्यथाविधि १६ त्रिविक्रमसमभ्यर्च्यपंचाग्नींश्चापिसाधयेत् दधिभक्तंब्राह्मणेभ्योजलदानंतथापरम् १७ कुरुष्वैवंमासमात्रंतनःप्रीतोभवेद्धरिः आनयिष्यतितांगंगासर्वपापहरांशुभाम् १८ शिवस्यवचनंश्रुत्वातत्चकारभगीरथः तस्यानुष्ठानमात्रेणविष्णुःसान्निध्यमागतः १९ स्तुत्वानत्वाहरिंप्राहगंगांपरमपावनीं हरिरुवाच याहिभद्रेमयासार्द्धंमंदाकिन्यास्तटेशुभे २० कुरुतत्रजपंहोमंस्नानंचद्विजतर्पणम् व्रतंचानशनंतत्रभक्तियुक्तेनचेतसा २१ संवत्सरंकुरुष्वेवंपश्चाद्यास्यसित्वत्सह विष्णोश्चवचनंतथ्यमत्वासाकंजगामसः २२ मंदाकिन्यास्तटेरम्येस्थित्वाहूतदनुष्ठितम् चकारपरयाभक्त्यातदातुष्टासरिद्वरा २३ आविर्भूताथतस्याग्रेस्त्रीरूपाचारुलोचना ज्ञात्वानांत्रिपदांगंगांतुष्टावभक्तिपूर्वकं २४ मंदाकिनीतनस्तुष्टावरंब्रूहीतिचाब्रवीत् याहिभद्रेमयासार्कंभूतलेपितृमुक्तये २५ तथेत्युक्तायतयातेनसार्कंसावसुधातले प्रतिपन्नागतासापिदशाम्यांजलरूपिणी २६

१९ आनीयतामितिशेषः २० २१ २२ २३ त्रिपदां त्रिभुलोकेषुपदंस्थानं यस्याःसा स्वर्धुनी भागीरथी भोगवतीतिनाम्नाप्रसिद्धामित्यर्थः २४ २५ २६

२७ २८ इतिज्येष्ठमाहात्म्यटीकायांषोडशोऽध्यायः १६ ७ अथातः एकादश्यादिदिनमाहात्म्यंवर्णयन् व्यासपांडव संवादमाह ज्येष्ठेत्यादिना १ २ वैष्णवान् वैष्णवधर्मान् ३ स्वल्पोपायेन साध्यमिनिशेषः ४ ५ ६ ७ बहु

अवतीर्णोवस्वमतीलोकानांपावनायच अतःसादशमीपुण्यारव्यातादशहरेतिच २७ ततस्तस्याजलैर्दिव्यैः पितरः प्लाविताद्विजाः दिव्यदेहधराःसर्वेगतास्तेविष्णुमंदिरम् २८ इतिश्रीभविष्योत्तरपु ज्येष्ठमासमाहात्म्येषोडशोऽध्यायः १६ ७ व्यासउवाच ज्येष्ठमासेनृपश्रेष्ठयाशुक्लैकादशीभवेत् निर्जलंसमुपोष्यात्रजलकुंभान्सशर्करान् १ प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधौ युधिष्ठिरउवाच श्रुतामेमानवाधर्मावैदिकाश्चमयाश्रुताः २ द्वैपायनमयाद्यत्वंचैष्णवान्वक्तुमर्हसि वेदव्यासउवाच श्रुतायेमानवाधर्मावैदिकाश्चश्रुतास्त्वये ३ कलौयुगेन शक्यतेतेवैकर्तुंनराधिप स्वल्पोपायेनयत्किंचिदल्पक्लेशंमहाफलम् ४ पुराणानांचसर्वेषांसारभूतंवदामिते एकादश्यांनभुंजीतपक्षयोरुभयोरपि ५ एकादश्यांनभुंक्तेयोनयातिनरकंनुसः व्यासस्यवचनंश्रुत्वाकंपितश्चायमब्रवीत् ६ भीमसेनोमहाबाहुर्भीतोवाक्यमभाषत भीमसेनउवाच पितामह्यशक्तोहमुपवासंकरोमिकिम् ७ ततोबहुफलंब्रूहिव्रतमेकमपिप्रभो व्यासउवाच वृषस्थेमिथुनस्थेवाशुक्लात्वेकादशीभवेत् ८ ज्येष्ठमासिप्रयत्नेनसोपोष्याजलवर्जिता स्नानंचाचमनंचैववर्जयित्वोदकंबुधः ९ उपभुंजीतनैवान्नंव्रतभंगोन्यथाभवेत् उदयाद्युदयंयावद्भुंजयित्वाजलंबुधः १० अप्रयत्नादवाप्नोतिद्वादशद्वादशीफलम् ततःप्रभातेविमलेद्वादश्यांस्नानमाचरेत् ११ जलं स्वर्णंदद्याच्चद्विजातिभ्योयथाविधि भुंजीतकृतकृत्यस्तु ब्राह्मणैःसहितोवशी १२

बलंप्रभावः फलमितियावत्यस्यतत्

८ उदकं वर्जयेदिनिशेषः ९ द्वादशद्वादशीफलं अत्रद्वादशीशब्दश्चैकादशीपरः १० ११ १२ ७

एवंकृतेनुयत्पुण्यंभीमसेनशृणुष्वतत् संवत्सरस्यमध्येतुएकादश्योभवंत्युत १३ नासांफलमवाप्नोतिक्रमेणात्रनसंशयः मांकेशवत्दषीकेशशंखचक्रगदाधर १४ तस्यव्रतस्ययत्पुण्यंतन्मेप्रातंजनार्दन एकादश्यांसितेपक्षेज्येष्ठस्योदकवर्जितम् १५ उपोष्यफलमाप्नोतिनच्छृणुष्वदकोदर सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलम् १६ सर्वहोमेषुयत्पुण्यंतदस्याःसमुपोषणात् संवत्सरेणयाश्चास्युःशुक्लाःकृष्णादकोदर १७ उपोषिताश्चताः सर्वा एकादश्योनसंशयः धनधान्यप्रदाःपुण्याः पुत्रारोग्यप्रदास्तथा १८ उपोषितानरव्याघ्रइतिसत्यंब्रवीमिते यमदूतामहाकायाः कृरालाःकृष्णरूपिणः १९ दंडपाशधरारौद्रामरणेदृष्टिगोचरम् नप्रयांतिनरव्याघ्रएकादश्यामुपोषणात् २० पीतांबरधराःसौम्याश्चक्रहस्तामनोजवाः अंतकालेनयंत्येनंवैष्णवंवैष्णवीपुरीम् २१ तस्मात्सर्वप्रयत्नेनउपोष्याजलवर्जिता जलधेनुंतथादत्वासर्वपापैःप्रमुच्यते २२ ज्येष्ठमासिनृपश्रेष्ठयाशुक्लैकादशीशुभा निर्जलंसमुपोष्यात्रंजलकुंभान्सशर्करान् २३ प्रदायविप्रवर्येभ्य स्तापत्रयविवर्जितः विष्णुलोकमवाप्नोतिमोदतेविष्णुसन्निधौ २४

इतिश्रीभविष्योत्तरपु॰ज्येष्ठमासमाहात्म्येसप्तदशोऽध्यायः १७



ध्व भीमसेनउवाच यत्त्वयाकथितंतातमाहात्म्यमपिचाद्भुत प्रतिभातिनमेसत्यंसततंमूढचेतसः १ तस्मात्कथयमेसत्यंत्यक्त्वावात्सल्यभावनाम् नोचेन्नाशंगमिष्यामिविदुरस्यवचोयथा २ मंत्रीपुरोहितोवैद्यस्त्रयोयस्यप्रियंवदाः तस्यत्रीणिविनश्यंतिकोशोधर्मःकलेवरम् ३ व्यासउवाच कथितंयन्मयापूर्वंतवसर्वंसमासतः नानृतंतद्विजानीहिसर्वथापवनात्मज ४ २३ २४ इति



ज्येष्ठमासमाहात्म्यटीकायांसप्तदशोऽध्यायः १७ ६ १ २ विदुरवचनमेवाह मंत्रीति एतेत्रयः यस्यहितोपदेष्टारोनसंतीतिशेषः ३ ४

अत्रसंशयनिरासार्थं कथांप्रस्तौति अत्रेति ५ ६ ७ ८ पुरोऽग्रभागे पश्चात्पृष्ठभागे ९ १० प्रेषयामासे-

अत्रनेकथयिष्यामि इतिहासंपुराननम् विशेषश्रवणादेवसंशयस्तेगमिष्यति ५ पुराकालंजरगिरौपुलिंदोनाम-
श्रुतः राजासकलधर्मज्ञः कृत्वाराज्यमकंटकम् ६ द्वारावतीसमंतत्रकल्पयित्वापुरंमहत् अनेकरथपत्तीकोगर्जैरै
रावतोपमैः ७ उच्चैःश्रवःसमैरश्वैर्बहुभिःपरिवारितः निर्गतोजययात्रायेसचिवैरनुमोदितः ८ शतयोजनविस्तीर्णावा
हिनीप्रययौपुरः तस्यपश्चात्तथाभूताच्छाद्यंतीरसातलम् ९ सप्तव्यूहायथौसेनायथासप्तमहाब्धयः जिताभाडलि
कावीराराजानोराजसेवकाः १० तेभ्योगृहीत्वाविपुलंकरभारंपुरेनिजे तथैवाजित्वाभूलोकेराज्ञोवै चक्रवर्तिनः ११
यान्यान्सेनापतीन्वीरश्रृणोतिस्मबलीयसः तांस्तान्जित्वारयाद्वत्वापुलिंदोमदगर्वितः १२ एवंपर्यटतस्तस्यचा-
शावृत्तंन्यवेदयन् आस्तेकःसकलाधीशोराजापरमधार्मिकः १३ श्रुतिस्मृतिपुराणज्ञोदेवतातिथिपूजकः शूरःस
त्यप्रतिज्ञश्चनैचकेनापिनिर्जितः १४ तमनिर्जित्यभूलोकेननेकीर्तिःकृतोषिणी इतिनद्दचनंश्रुत्वापुलिंदोमंत्रिभिः
सह १५ वाहिनीसहितंतूर्णंययौप्राचीनबर्हिषम् नगरंवेष्टयत्परितःस्थितोसौसैनिकाभृशम् १६ यथावृकगणैरेत्य
मेषसंघोवनांतरे ततः कोलाहलोजातः पुरमध्येतपोधनाः १७ राजानंकेचिदाचख्युर्भन्निणश्चापरेतथा ज्येष्ठस्यैका
दशीशक्ताअस्तिचास्मिन्दिनेनृप १८ सर्वेस्नानाःसमुदिताविष्णुपूजारताश्चते परस्परंनचोचुस्तेसर्वेतद्वृतमान
साः १९ पुलिंदसैनिकाःसर्वेग्रामंप्रविविशुस्तदा विलुंठनपराःसर्वेनकोपितान्न्यवारयत् २० पुलिंदतुनमस्कृत्य-
केनापिग्रामवासिना सामवाक्यमुवाचेदंसंयोज्यकरसंपुटम् २१

विशेषः ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

अद्येवास्तिनृपश्रेष्ठपुण्यंचैकादशीव्रतम् उपास्यतेनागरिकैराज्ञयानृपतेःखिलैः २२ नाद्याहारोनचालापोनाहिंसानानृतंतथा नैवदोषकृतकर्मक्रियतेप्रभुणासह २३ तस्मात्क्षमध्वंनृपतेरद्यस्योचदयांकुरु नाहंनृपाज्ञयायातोवदामितवनिश्चितम् २४ दिनद्वयेत्वयायद्यत्क्रियतेतत्क्षमिष्यति परश्वःकिंभविष्यतिकिनजानामिभोनृप २५

इतिश्रीभविष्योत्तरपुज्येष्ठमासमाहात्म्येअष्टादशोऽध्यायः १८ ७ व्यासउवाच इतितस्यवचःश्रुत्वापुलिंदोग्रामवासिनः उवाचतृष्परीतात्मागर्वयुक्तेनचेतसा १ केयमेकादशीनामक्रियतेतत्रकिंव्रतम् मोयंजल्पसिकिंमूढशिवंगच्छनिजालयम् २ नोचेत्त्वांपीडयिष्यतिदूताःपरमदारुणाः ततस्तेसैनिकाःसर्वेप्रविष्टानगरांतरे ३ भित्त्वाग्रहकपाटानिचणिजानांमहात्मनाम् निन्युःसमस्तंसदनान्वस्तुजातंशनैःशनैः ४ तथैवधनिकानांचगृहान्नीतंमहाधनम् एवंप्रनिगृहव्यासंघोरैश्चापथैस्तथा ५ कंदमूलफलंतोयंनलब्धंपुरवासिनः एवंचोपोषणंजातं प्राणिनाजलवर्जितम् ६ गतेस्तंचंडकिरणेबालेपिपयवर्जिते हाहाकारःसमभवत्एकोवैनगरांतरे ७ सयोगीभगवान्विष्णुर्गौर्लोकेचकिलोभवत् सभानइवचोत्तस्थौफणीद्रइवसंस्थितः ८ आहूयगरुडंक्रुर्णेशशंससकलंतदा आरुह्यप्रययौतूर्णंनिर्ममेविविधांचमूम् ९ त्रिनेत्रांसमहस्तांचचतुष्पादांमहाभुजाम् दंतुरांत्रिशिरस्कांचहृद्वक्त्रांदशवक्त्रकां १० षड्वक्त्रांपंचवक्त्रांचगजवक्त्रांगजाकृतिं सिंहास्यनिंमहाघोरांनृसिंहइवभास्करां ११ सिंदूरचर्चितमुखींमहिषासुरसदृशीं करालांविकरालांचनीलांजनसमप्रभाम् १२

नृपतेर्गर्वपरिहारमाह इतीत्यादिना १ २ ३ ४ ५ १८

६ ७ तंश्रुत्वेतिशेषः सःयोगीभगवान् ८ ९ १० भास्करांप्रदीप्तां भीषणांमिनियावत् ११ १२

१३ १४ १५ १६ १७ सादिनः अश्वारोहास्तत्सादिनइत्यमरः १८ १९ पलायनपराभवन्नि-

ऊर्ध्वकेशींद्विग्वसनांनरमुंडधरांतथा अंत्रमालाधरांतद्वद्वीपिचर्मपरीवृताम् १३ अदृष्टपूर्वांमनुजैर्ददावाज्ञांतदाविभुः नृपाधमपुलिंदस्यसबलस्यममाज्ञया १४ नाशंकुरुमयत्नेनयावन्नोदेतिभास्करः इत्याज्ञांशिरसागृह्यप्रविष्टाःपरसैनिकान् १५ जघ्नुस्तेशस्त्रसंघातैस्तदाकोलाहलोभवत् केचित्खड्गैश्चनिहताःखड्गांगाभिहतारुषा १६ दशनैर्दशिताश्चान्येभक्षिताश्चनखैरपरे पलायनपरान्वीरान्पादेधृत्वान्यवारयत् १७ एवंपदातयोवीरानिहताभक्षिताःपरे रथाश्वसादिनोवाहादशनैश्चूर्णिताभृशम् १८ शिबिकानिप्रदग्धानिप्रकाशस्तत्रचाभवत् नदाविसिस्मिरेसर्वेकेयूपंकुतआगताः १९ नैवतेमानवावीरास्तेक्षिप्तायत्रकुत्रचित् इतिबुध्वातनःसर्वेपलायनपराभवन् २० दृष्ट्वापलायनपरान् निजघ्नुःपृष्ठलग्नकाः एवंतेनिहताःसर्वेपुलिंदस्यचसैनिकाः २१ पुलिंदोपियदायोद्धुंक्रोधाद्विष्णुगणैःसह यामास्त्रैमकरोद्युद्धंशस्त्रैरस्त्रैश्चदारुणैः २२ नसमर्थोयदायोद्धुंनदम्नस्यचितयत् पलायनमितःकुर्यावधिष्यंतिनसंशयः २३ इतिनिश्चित्यमनसिमेघास्त्रंत्यक्तवान्स्वयम् ध्यातंतत्राद्भवद्घोरं ववर्षुश्चघनाघनम् २४ ववुःप्रचंडपवनास्तदासर्वेविमोहिताः विमूढाःसर्वकार्येषुतस्थिवांसःस्थलेषुते २५ पुलिंदोहयमारुह्यएकाकीस्वपुरंययौ हतशेषास्तदाकेचित्सैनिकाययुरन्वहम् २६ कृत्वाकार्ययोस्थानंभगवान्भक्तवत्सलः ततःप्रभातेविमलउत्थितावित्स्मृताभृशम् २७ नापश्यद्वाहिनीशंत्रोःस्वप्नमेवास्तिनिश्चितम् ततःस्नानादिकंचक्रुःशरणंहरिवल्लभं २८ पारणांतेबहिर्यातादृष्टंतत्कौतुकंमहत् अनेकानिचप्रेतानिपतितानिरणाजिरे २९ त्यत्रसंधिरार्षः २० पृष्ठलग्नकाइत्यत्रस्वार्थेकः

प्रत्ययः २१ २२ २३ २४ तस्थुस्तेतस्थिवांसइति २५ २६ २७ स्वप्नएवनिश्चितमस्तिइतिमत्वेतिशेषः २८ २९

इतिश्रीभविष्योत्तरपु० ज्येष्ठमाहात्म्ये एकोनविंशोऽध्यायः १९ ७ ऋषयऊचुः अत्याश्चर्यंत्वयाख्यातंसर्वेषां मोहनाशनम् माहात्म्यंज्येष्ठमासस्यएकादश्याःप्रभावतः १ तत्साक्षात्परमंब्रह्मयोगिगम्यंसनाननम् आगतः शत्रुसंहारकर्तुवाचामगोचरम् २ उक्त्वैवंपुनरूचुस्तेव्यासंनंवदतांवरं किंचकारततोराजापुलिंदोदुःखपीडितः ३ व्यासउवाच ततःशोकातुरोराजाकैश्चिच्चमुचरैर्वृतः नूर्णंस्वपुरमासाद्यनिजदेशाधिपोभवत् ४ तद्वाक्यंमनसाध्यायन्स्वशत्रुपुरवासिनः एकादश्याःप्रभावंचस्वदृष्टेरपिगोचरम् ५ गतेबहुतियेकालेचिंतामग्नेनृपोत्तमे अस्थिचर्मावशेषेतुददौराज्यंनिजात्मजे ६ सपत्नीकोवनंयातोचानप्रस्थंचकारसः हादशाहेत्वतिक्रांतेपृच्छमानेतपोधनान् ७ कथमेकादशीनामव्रतंपापप्रणाशनम् दुर्लभंत्रिषुलोकेषुपाचनंहरिवल्लभम् ८ अहोतस्यमहाश्चर्यंमयादृष्टंन संशयः ततःपूर्वभवस्तुएयंनिश्चयान्मुनिपुंगवः ९ दत्तात्रेयःसमभ्यागात्चरण्यस्याश्रमेशुभे सर्वेऋषिगणास्तत्र आगतादर्शनोत्सुकाः १० केचित्पूजास्तवंचक्रुःसेवांचविविधांतथा जगामसोपितच्छ्रुत्वाभीतभीतइवस्थितः ११ गनेषु ऋषिमुख्येषुराजानिकटमाययौ दंडवत्पतितोभूमौविंध्याचलइवापरः १२ उत्तिष्ठोत्तिष्ठकोसित्वंकिमर्थमिह चागतः वदस्वसकलंमेयत्त्वयिदुःखस्यकारणम् १३ श्रुत्वापिवचनंतस्यनोत्तस्थौभृशदुःखितः ततउत्थापयामास स्वकरेणनृपोत्तमम् १४ उवाचनृपशार्दूलोज्ञात्वातस्यानिसोत्हृदम् पुलिंदोहंनृपश्रेष्ठोविख्यातोजगतीतले १५ जित्वाचसकलंतातवस्कधामंडलंक्षणात् ततोहंगर्वमासाद्यगतःप्राचीनबर्हिषम् १६

निजात्मजे निजात्मजायेत्यर्थः ६



७ ८ पूर्वभवत् प्राक्तनं ९ १० ११ १२ १३ १४ १५ १६

१७ १८ नजहामि पुरं नत्यजामि इतिनदानमवोचमितिशेषः १९ २० २१ २२ २३ शल्यसमान् शरीरप्रविष्टबाणायसदृशान् इमान् प्राणान् २४ २५ इतिज्येष्ठमासमाहात्म्यटीकायांविंशोऽध्यायः २० ७ प्रस्तुतंनियम-

पीडितंतस्यनगरंविष्णुभक्तस्यभूभुजः ग्रामवासीनरःकश्चिदागतोममसन्निधौ १७ उवाचेदंवचोमत्यमद्यैवास्तिहरेर्दिनम् अद्यश्वस्त्वंक्षमस्वेतिसर्वव्रतपरायणाः १८ इतिस्यवचःश्रुत्वामदगर्वेणमोहितः अवमत्यचतद्वाक्यंनजहामितदेतितम् १९ एवमस्तमितेभानौविष्णुमायाविनिर्मिताः दूताःसहस्त्रशोयोद्धुमागतावयमुत्कटम् २० तैर्भक्षितंहतंसर्वंसैन्यंसागरसन्निभं प्राणशेषावयंयाताःपलाय्यनिजपत्तनम् २१ तदादेश्रममाणोहंज्ञानुमेकादशीव्रतम् त्यक्त्वाराज्यंसुतधनंतापसींवृत्तिमास्थितः २२ धन्योहंकृतकृत्योहंपूर्वजाःपुण्यशालिनः यत्दृष्टंभवतःपादपद्मंसुरवरार्चितम् २३ कथंचैकादशीनामकार्यंव्रतमनुत्तमम् समासेनविधिंब्रूहियतस्त्वांशरणागतः नोचेत्यक्ष्यामिवैप्राणान्अहंशल्यसमानिमान् २४ इत्थंवचोवदंतिनत्रपुलिंदनाथे दत्तात्रयोपिसकलार्थविदंतदानीम् आलिंग्यतंनरपतिं करुणार्द्रचित्तोऽचेतयाव्रतविधिंमधुसूदनस्य २५ इतिश्रीभविष्योत्तरपु ज्येष्ठमाहात्म्येविंशोऽध्यायः २० ७ दत्तात्रेयउवाच शृणुराजन्प्रवक्ष्यामि तद्व्रतंविधिपूर्वकम् दशम्यांप्रातरुत्थायकृत्वाशौचविधिंनृप १ वर्जयेद्दंतकाष्ठानिपक्वपर्णैश्चशोधयेत् स्नानंकृत्वामहानद्यांपंचगव्यैःसमंत्रकम् २ कृत्वासंध्यादिकंकर्मशुक्लवासाग्रहंव्रजेत् गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः ३ देशकालंसमुच्चार्यप्रणम्यद्विजपुंगवान् अद्यदेवेशतेभक्त्याकरिष्येव्रतमुत्तमं ४ सिद्धिर्भवतुमेसर्वात्वत्प्रसादाद्रमापते इतिसंकल्पविधिवत्कृत्वानित्यविधिंनृप ५

पूर्वकमेकादशीव्रतंनिरूपयति शृण्वि

त्यादिना १ दंतानितिशेषः २ औदुंबरंपात्रं ताम्रमयंपात्रम् ३ ४ ५ ६ ७

पूज्यइत्यत्रत्यपत्र्आर्षः ६ आमिषं जंबीर मसूरगोमहिष्यान्नतमदुग्धादिकं अग्रेपिवक्ष्यतिच ७ अभ्यंजनं अभ्यंगं ८ हरितुल्यभु
क् हरिः एकादशीतिथिः तत्तुल्यं भुनक्तीतिहरितुल्यभुक् एकादश्यांभोजनाभावाद्दशम्यामपि उपोषण वदल्पभोजनं कर्तव्यमितिभावः ९

विष्णोश्चप्रतिमांपूज्यशालग्रामशिलांतथा उपचारैःषोडशभिःपूजयेद्भक्तिपूर्वकम् ६ व्यवायंतांबुलं निंदांद्यूतंदु-
ष्टसमागमम् परान्नंचपुनर्भुक्तमामिषंवपनंतथा ७ दशम्यांवर्जयेद्राजन्तैलेनाभ्यंजनंतथा हविष्याद्व्यतिरिक्तंय-
त्तत्सर्वमामिषंस्मृतम् ८ अतःसर्वप्रयत्नेनदशम्यांहरितुल्यभुक् रात्रौजागरणंकृत्वातत्कथाश्रवणादिभिः ९ ततो
ऽरुणोदयेजातेस्नात्वानिर्मलवारिणा पूजागारेसमागम्यनित्यंसंध्यादिकंचरेत् १० नकिंचित्चिंतयेच्चित्तेप्राक्रुतं-
नावलोकयेत् सहस्रनामभिर्विष्णोःपूजनंतुलसीदलैः ११ तथासूक्तैःपावमानैरभिषिच्यजनार्दनम् भेषजंचामृतं
स्वापंप्रेक्षणंभाषणंस्त्रियः १२ क्रोधंपारुष्यमालापंकांस्यैर्वादंतधावनम् एकादश्यांविशेषेणवर्ज्यंतुव्रतिभिःसदा
१३ यामेयामेप्रकर्तव्यापूजादेवस्यचक्रिणः अहोरात्रमिदंकार्यंगीतवादित्रनिःस्वनैः १४ ततःप्रभातसमयेयावतीह्याद
शीभवेत् तावत्यापारणंकुर्याद्भक्तियुक्तेनचेतसा १५ नोचेत्सर्वस्यपुण्यस्यहानिर्भवतिनिश्चितम् अतःसर्वप्रयत्नेन-
द्वादश्यांपारणंशुभम् १६ कर्तव्यंव्रतिभिर्वत्ससंपूर्णफलसिद्धये पारणाहेबहून्विप्रा न शक्तौद्वादशापिहि १७
पूजयेदुपचारैश्चभोजयेत्पायसैस्तथा आनृते स्तुतिपर्यंतंसघृतैःखंडपायसैः १८ भोजयित्वाद्विजान्श्रेष्ठान्स्वयंभुं-
जीतवाग्यतः परान्नस्याशनंमाषंमांसंतैलंस्त्रियंमधु १९ भेषजंमत्सरंहिंसांकांस्यंतांबूलभक्षणम् परान्नंचपुनर्भु
क्तिंद्वादश्यांवर्जयेत्सदा २० १० ११ १२ १३ १४ १५ १६ १७ १८ परान्नस्यभ्रशनंपरान्नलक्षणमाहजि २०
ह्वाचपलतोलोभाद्बंधुष्वन्नवानपि यच्चान्नमदन्नाति परान्नमभिधीयत इति १९ परान्नं परेणास्वगृहेआनीय दत्तमन्नं तद्वर्जयेदित्युपलक्ष-

णमेतन्द्रव्यादेरपि २० २१ २२ केवलधान्यसंभवमन्नंनभवतीतत्रशातातपः घृतपक्वंपयःपक्वंपक्वंकेवलवन्हिना तदन्नंफल
वद्ब्राह्म्यमितिशातातपोब्रवीदिति २३ २४ मेदमत्रसंधिरार्षः २५ २६ २७ २८ २९

द्दिनैस्त्रिभिरिदंसाध्यंव्रतानामुत्तमंव्रतम् एकादश्यांनकर्तव्यंभोजनंनृपसत्तम २१ अन्नंतुसर्वथावर्ज्यंभक्षणान्नर
कंव्रजेत् द्रव्यंजलंचलवणंवन्हिनायत्रपच्यते २२ तदेवान्नंभवेत्तत्रनचान्यद्धान्यसंभवम् धान्यंचादंतियेमोहात्सं-
प्राप्तेहरिवासरे २३ चांद्रायणशतंकृत्वामुच्यंतेपातकाद्भृशम् इतितेकथितंराजन्यत्पृष्टंचत्वयाधम २४ पुलिं
दउवाच त्वयायत्कथितंतात्तुरहस्यंपरमाद्भुतम् अनुष्ठातुमशक्तोऽहंपश्यमेदकलेवरम् २५ अतस्त्वंकृपया-
ब्रूहिसारंसारयथोदितम् सर्वेषामेवकार्याणांसारमस्मिनसशयः २६ दत्तात्रेयउवाच कथयामिमहाबाहो
रहस्यंपरमाद्भुतम् यस्यानुष्ठानमात्रेणसफलंसकलंभवेत् २७ शुक्लस्यैकादशीशुक्लाकुरुष्वजलवर्जिता नस्या
नुष्ठानमात्रेणपूर्णंभवतिनिश्चितम् २८ पुलिंदउवाच शुक्लस्यैकादशीशुक्लासाकथंजलवर्जिता दत्तात्रेय
उवाच प्राचीनबर्हिषःपूर्वंसकलंहरिवासरे कृतंजलविहीनंयत्ततःसाजलवर्जिता २९ निर्जलेतिसमाख्याता
स्मरणादघनाशिनी ऋषीयातेपुलिंदोपिचकारविधिपूर्वकम् ३० तस्यानुष्ठानमात्रेणपुण्यस्यातिशयेनच ब्रह्मा-
दोनामविख्यातोहिरण्यकशिपोःशिशुः ३१ व्यासउवाच एतत्तेकथितंभीमइतिहासंपुरातनम् सशयस्यनिरा
सार्थंकिंपुनःश्रोतुमिच्छसि ३२ भीमसेनउवाच नष्टोमोहस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत स्थितोस्मिगतसंदेहः
करिष्येवचनंतव ३३ स्कंदउवाच भीमेनापिकृतंतच्चव्यासेनकथितंयथा सर्वपापविनिर्मुक्तःप्रसादाच्चक्रपाणि
नः ३४ ३० ३१ ३२ ३३ ३४ ७२ ७३ ७४

इतिज्येष्ठमाहात्म्यटीकायामेकविंशोऽध्यायः २१ अथवटसावित्रीव्रतंप्रस्तौति अस्येत्यादिना- १ २ ३ ४ वर्षात्मकसावित्रीव्रतविषयेभोजननियममाह रात्राविति नित्यंरात्रौनक्तंवाकुर्वीतभोजनमितिशेषः नक्तलक्षणमाह दिवसस्याष्टमेभागेसं



इतिश्रीभविष्योत्तरपु-ज्येष्ठमासमाहात्म्येएकविंशोऽध्यायः २१ अ स्कंदउवाच अस्यैवशुक्लपक्षस्य त्रयोदश्यादितःशुभम् पौर्णमासीव्रतंकार्यंस्त्रीभिःसौभाग्यवृद्धये १ तत्रैवोपोषणंकार्यंपारणांप्रतिपत्तिथौ ऋषिरुवाच विधिंब्रूहिमहासेनव्रतस्यास्यषडानन २ स्कंदउवाच ज्येष्ठमासेनुसंप्राप्तेपौर्णमास्यांपतिव्रता शुचिर्भूत्वावटंसिंचेज्जलैरमृतसन्निभैः ३ सूत्रेणवेष्टयेद्भक्त्यागंधपुष्याक्षतैःशुभैः नमोवैवस्वतायेतिभ्रमयंतीप्रदक्षिणाम् ४ रात्रौकुर्वीतनक्तंचत्यब्दमेकंसमाहिता नत्वैवटवृक्षंचपक्षेपक्षेपूजयेत् ५ संप्राप्तेचपुनर्ज्येष्ठेएकभुक्तद्वादशींनयेत् दंतानांधावनंकृत्वानियमंकारयेत्ततः ६ त्रिरात्रंलंघयिष्यामिचतुर्थेदिवसेत्यहं चंद्रायार्घंप्रदत्वाचपूजयित्वाचतांसतीम् ७ मिष्टान्नानियथाशक्त्याभोजयित्वाद्विजोत्तमान् भोक्ष्येहंचजगद्धात्रिनिर्विघ्नंकुरुमेशुभे ८ ततोब्रह्मशमयंपात्रंसमधान्यभृतंचयत् कलशोपरिसंस्थाप्यप्रतिमांवस्त्रसंयुताम् ९ ब्रह्मणासहसावित्रीसौवर्णीप्रतिमांशुभाम् तत्रैवयमधर्मस्यकार्य्येत्पूजयेत्तथा १० न्यग्रोधस्यशुभेमूलेत्रिदिनंतत्रवासयेत् पूर्णायांप्रातरुत्थायस्नात्वामृत्स्नानपूर्वकम् ११ सत्यवंतंचसावित्रींकृत्वास्वर्णमयींतथा पर्यंकेराजतेस्थाप्यकाष्ठभारंतथाकृतं १२ तत्रैवयममुद्दिश्यदीपदानंप्रचक्षते ददातियममुद्दिश्यभक्त्यादीपंपतिव्रता १३ साभर्तृसहितासाध्वीसमस्तस्वस्रवभागिनी नारीवाविधवावापित्र्यपुत्रावाकुमारिका १४

दिभूतेदिवाकरे नक्तंतच्चविजानीयान्ननक्तंनिशिभोजनमिति ५ ६ ७ २१

८ ९ १० ११ १२ १३ नारीवाइत्यत्रवाशब्दोनिश्चयार्थेवास्याद्विकल्पोपमयोरेवार्थेति समुच्चयइत्यभिधानात् १४

एताभिरितिशेषः १५ १६ १७ त्वयाऽयंकृतं व्यासमित्यर्थः सत्यव्रतधरः त्वंऽअर्घ्यंगृहाणेत्यन्वयः १८ १९ २० २१

सभर्तृकासपुत्रावाकार्यव्रतमिदंशुभम् ॐकारपूर्वकेदेविवीणापुस्तकधारिणि वेदगर्भेनमस्तेस्तुऽअवैधव्यंप्रयच्छ मे १५ पतिव्रतेमहाभागेवन्हिजायेशुचिस्मिते दृढव्रतेदृढमतेभर्तुश्चप्रियवादिनि १६ ऽअवैधव्यंचसौभाग्यंदेहित्वम मरुव्रते पुत्रान्पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोस्तुते १७ त्वयावृतंजगत्सर्वंसदेवासुरमानुषम् सत्यव्रतधरेदेवब्र ह्मरूपिनमोस्तुते १८ त्वंधर्मसाक्षीलोकानांशुभाशुभविवेककृत् वैवस्वतगृहाणार्घ्यंधर्मराजनमोस्तुते १९ धर्म राजःपितृपतिःसाक्षिभूतस्तुजंतुषु धर्मरूपगृहाणार्घ्यमवैधव्यंप्रयच्छमे २० एवंसांवत्सरंकार्यमशक्तोमासमात्र कम् तदशक्तौत्रिरात्रंवापूर्णमास्याविशेषतः २१ उपोष्यैवव्रतंकुर्याच्छुचिःस्यान्मासमात्रतः प्रातःस्नानमकृत्वाज्ये ष्ठेमासिकुलस्त्रियः २२ नासामवश्यंदौर्भाग्यंकृतेपिचमहाव्रते अशक्तेश्चयथाकर्मसकलंनिष्फलंतया २३ प्रा तःस्नानविहीनस्यज्येष्ठकर्मवतांनृणाम् एवंसर्वंसमाख्यातंसावित्र्याख्यंदिनव्रतम् २४ ज्येष्ठज्येष्ठायुताच्चेत्या च्छत्रोपानत्प्रदानतः नराधिपत्वमाप्नोतिनियमेननराधिप २५ माहात्म्यंज्येष्ठमासस्य संक्षेपेणयथोदितम् ऽअग्रेसर्वं वदिष्यामियुष्मद्भक्तिसंतोषितः कथांपापहरांपुण्यांमहाश्चर्यकरांहियत् २६ इतिश्रीभविष्योत्तरपु ज्येष्ठमा हात्म्येद्वाविंशोऽध्यायः २२ व्यासउवाच शृणुराजन्वरस्त्रीणांमहाभाग्यंयुधिष्ठिर सर्वमेनद्यथाप्राप्तं सावित्र्याराजकन्यया १ ऽअस्मिन्दिनेतुधर्मात्माराजापरमधार्मिकः ब्रह्मण्यश्चशरण्यश्चसत्यसंधोजितेंद्रियः २

व्रतंकुर्वंतीतिशेषः २२ २३ २४ प्रस्तुता पौर्णमासी ऽत्रसंबध्यते २५ ज्येष्ठमासस्येतिशेषः २६ इति-
ज्येष्ठमाहात्म्यटीकायां द्वाविंशोऽध्यायः २२ ७ एतद्वृत्तविषये इतिहासंप्रस्तौति शृण्वित्यादिना एतत्इदम् १ २

३ ४ ५ सावित्र्याः सावित्रीतुष्टये हुताशनसहस्रंस्थापयामासेतिशेषः ५ ७ ८ ९ १०

यज्वादानपतिर्धीमान्पौरजानपद प्रियः पार्थिवोश्वपतिर्नामसर्वभूतहितेरतः ३ क्षमावाननपत्यश्चसत्यवान्संय तेंद्रियः अतिक्रांतेनवयसासंतापमुपजग्मिवान् ४ अपत्योत्पादनार्थंचस्तुतेर्नियममाश्रितः कालेपरिमिताहारोब्रह्मचारीजितेंद्रियः ५ हुताशनसहस्रंससासावित्र्याराजसत्तमः षष्ठेषष्ठेतथाकालेबभूवमितभोजनः ६ एतेननियमेनाष्टवर्षाण्यथदशैवतु पूर्णेचाष्टादशेवर्षेसावित्रीतुष्टिमभ्यगात् ७ ऋत्विगेकस्तदाराजन्दर्शयामासतंनृपम् अग्निहोत्रात्समुत्थायहर्षेणमहतान्विता ८ उवाचचैववरदावचनंपार्थिवंतदा सावित्र्युवाच ब्रह्मचर्येणशक्रेनानियमेन दमेनवा ९ सर्वात्मनाचभक्त्याचतुष्टास्मिनवपार्थिव वरंब्रूहिचाश्वपतेमद्राजयथेप्सितम् १० नप्रमाद्श्वधर्मेषुकर्तव्यस्तेकथंचन अश्वपतिरुवाच अपत्याऽर्थसमारंभः कृतोधर्मेप्सयामया ११ पुत्रामोहकरादेविभवेयुःकुलभावनाः तुष्टासियदिमेदेविकाममेनंब्रवीम्यहम् १२ संतानंहिपरोधर्मइत्याहुर्मांद्विजातयः सावित्र्युवाच पूर्वमेवचमाराजन्नभिप्रायमिमंनव १३ ज्ञात्वोवाचसपुत्रार्थंभगवांस्तेपितामहः प्रमादाच्चैवतस्मात्तेस्वयंभुविदितादुवि १४ कन्यातेजस्विनीसोम्यक्षिप्रमेवभविष्यति उत्तरंचनतेकिंचित्व्याहर्तव्यंकथंचन १५ पितामहनिसर्गेणतुष्टात्येनब्रवीमिते तत्तथेतिप्रतिज्ञायसावित्र्यावचनंनृप १६ प्रसादयामासपुनःक्षिप्रमेनद्भविष्यति अंतर्हितायांसावित्र्यांजगामस्वंगृहंपुनः १७ स्वराज्यंप्राप्यसप्रीतःप्रजाधर्मेणपालयन् कस्मिंश्चिन्नुगतेकालेसराजातुधृतव्रतः १८ ज्येष्ठायांधर्मचारिण्यांमहिष्यांगर्भमादधे राजपुत्र्यांततोगर्भआलंब्यभरतर्षभ १९

११ १२ १३ १४ १५ पितामहनिसर्गेण पितामह मनोभिप्रायेण १६ १७ १८ आलंब्यउदरमालंब्य १९

व्यवर्धतायशक्लेनुतारापतिरिवांबरे प्राप्तेकालेनुसूषुवेकन्यांराजीवलोचनाम् २० क्रियाश्वतस्यामुदितश्वकेतुनृपतिस्तदा सावित्र्याप्रीतयादत्तासावित्र्याहुतयापिच २१ सावित्रीत्येवनामास्याश्चक्रुर्विप्रास्तथापिता माविग्रहवती चश्रीर्व्यवर्धतनृपात्मजा २२ कालेनापिचसाकन्यायौवनस्थाबभूवह तांसमध्यांचसस्त्रीणींप्रतिमांकांचनीमिव २३ प्राप्तेयंदेवकन्येतिदृष्ट्वासंमेनिरेजनाः तांतुपद्मपलाशाक्षींज्वलंतीमिवतेजसा २४ नकश्चिद्वरयामासतेजसाप्रतिबाधितः अथोपोष्यशिरस्नाता दैवतान्यभिनम्यसा २५ हुत्वाग्निंविधिवद्विप्रान्वाचयामासपर्वणि ततःसमनसस्तेषांप्रतिपूज्यमहात्मनः २६ पितुःसकाशमगमद्देवीश्रीरिवरूपिणी साभिवाद्य पितुःपादौसर्वपूर्वंनिवेद्यच २७ कृतांजलिर्वरारोहानृपतेःपार्श्वतःस्थिता यौवनस्थांतुतांदृष्ट्वास्वसुतांदेवरूपिणीम् २८ अयाचमानाचवरैर्नृपतिर्दुःखितोऽभवत् राजोवाच पुत्रिप्रदानकालस्तेनकश्चित्त्वांवृणोतितु २९ स्वयमन्विष्यभर्तारंगुणैः सदृशमात्मनः प्रथितापुरुषोयश्चसंभिवेद्यस्त्वयामम ३० तस्याहं त्वांप्रदास्यामिवरयत्वंयथेप्सितं श्रुतंहिधर्मशास्त्रेषुपठ्यमानंद्विजातिभिः ३१ तथात्वमपिकल्याणीगदतोमेवचःशृणु अप्रदातापितावाच्यो वाच्याचानुपयंत्र्यपि ३२ गतेभर्तरिपुत्रश्चवाच्योमातुररक्षिता इदमेववचःश्रुत्वाभर्तुरन्वेषणेचरन् ३३ देवानामवमान्यश्चनभवेयंतथाकुरु स्कंदउवाच एवमुक्काहितंवाक्यंपृष्ट्वावृद्धांश्चमंत्रिणः ३४ व्यादिदेशानुयानाश्वगम्यतांचेत्यचोदयत् साभिवाद्यपितुःपादौव्रीडितेवतपस्विनी ३५

कथनीयः ३० ३१ अप्रदाताकन्यादानमकुर्वाणः पितावाच्यः निंद्यः अनुपयंत्री विवाहमकुर्वती कन्यापि वाच्यानिंद्या शेषंस्पष्टं ३२ ३३ ३४ ३५

३६ ३७ दर्शनादिक्रमितिशेषः ३८ इतिज्येष्ठमाहात्म्यटीकायांत्रयोविंशोऽध्यायः २३ ७ कथायोगान्कथासंगतीः
कथासंबंधानित्यर्थः १ २ ३ ४ सासावित्रीउवाचेतिशेषः ५ ६ ७ ८ सःवा

पितुर्वचनमाज्ञायनिर्जगामाविचारितम् साहिसंरथमास्थायस्थविरैःसचिवैर्वृता ३६ तपोवनानिरम्याणिराजर्षी णांजगामह मान्यानांतत्रवृद्धानांकुर्वीत्यादाभिवंदनम् ३७ बनानिक्रमशस्तानिसर्वाण्येवाभिगच्छत एवंसर्वे षुतीर्थेषुवनोत्सर्गंनृपात्मजा कुर्वतीद्विजमुख्यानांतंतंदेशंजगामह ३८ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमास॰ माहात्म्येत्रयोविंशोऽध्यायः २३ ७ स्कंदउवाच अथमद्राधिपोराजानारदेनसमागतः उपविष्टःस॰ भामध्येकथायोगानभाषत १ ततोभिगम्यतीर्थानिसर्वाण्येवाश्रमाणिच आजगामपुनर्वेश्मसावित्रीमात्रिभिः सह २ नारदेनसमासीनदृष्ट्वासापितरंशुभा उभयोःसापिशिरसाकृत्वापादाभिवंदनम् ३ नारदउवाच क्वगताभूत्सुतेयंतेकुतश्चैवागतानृप किमर्थंयुवतीभर्त्रेनवेतांसंप्रयच्छसि ४ राजोवाच कार्येणरवल्वनेनै वप्रेषिताचैवचागता स्कंदउवाच ततःसाम्भृणुदेवर्षेभर्तांचाद्यमयागृतः ५ तद्ब्रूहिविस्तरेणेतिपित्रासंचोदि नाशुभा एवंतस्यैववचनंप्रतिगृह्येदमब्रवीत् ६ सावित्र्युवाच आसीच्छाल्वेषुधर्मात्माक्षत्रियःपृथिवीपतिः द्युमत्सेनइतिख्यातोदैवादंधोबभूवह ७ विनष्टचक्षुषस्तस्यबालपुत्रस्यधीमतः सामंतेनहृतंराज्यंछिद्रेस्मिन्पूर्ववै रिणा ८ सबालवत्सयासार्द्धं भार्ययाप्रस्थितोवनं महारण्यंगतश्चापितपस्तेपेमहाव्रतः ९ तस्यपुत्रःपुराजातःसत्यवृ क्षस्यतपोवने सत्यवाननुरूपश्चभर्तामेमनसिव्रतः १०

लवत्सयाबालः वत्सोपुत्रोयस्या तयाभार्ययेत्यर्थः ९ १० ६ ६ ६

११ १२ १३ अपिप्रश्ने गर्हासमुच्चयप्रश्नशंकास्वंभावनास्वपीत्यमरः अस्ती शेषः १४ १५ १६ १७

नारदउवाच अहोबतमहत्पापंसाविज्यानृपतेकृतम् अजानंत्याकृतोभर्तासत्यवान्गुणसंमतः ११ सत्यंवदत्यस्यपितासत्यंमानाप्रभाषते ततोस्यब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति १२ बालस्याश्वःप्रियायस्यकरोत्यश्वाश्च मृन्मयान् चित्रेपिचलिखत्यश्वान्चित्राश्वश्चेतिचोच्यते १३ राजोवाच अपिदानासतेजस्वी बृहत्यावाचानृपात्मजः क्षमावानप्रियःशूरःसत्यवान्पितृवत्सलः १४ नारदउवाच विवस्वानिवतेजस्वीबृहस्पतिसमोमतौ महेंद्रइवशूरश्चवसुधेवक्षमान्वितः १५ राजन्नप्यात्मनोदानाब्रह्मण्यश्चापिवीर्यवान् रूपवानप्युदारोवाअथवाप्रियदर्शनः १६ सांप्रतंरंतिदेवस्यस्वशक्त्यादाननःसमः ब्राह्मणःसत्यवादीचविशिरौशीनरोयथा १७ ययातिरिवयोदारःसोमवत्प्रियदर्शनः रूपेणसदृशोश्विभ्यांद्युमत्सेनसुतोबली १८ सदांतःसमृदुःशूरःसत्यसंधोजितेंद्रियः संक्षेपतस्तयोवृंद्दैःशीलवद्भिश्चकथ्यते १९ अश्वपतिरुवाच गुणैरुपेतंसर्वैस्तंभगवान्प्रब्रवीषि मे दोषानपिचमेब्रूहियदिसंतिहिकंचन नारदउवाच एकएवास्यदोषोस्तिगुणानाक्रम्यतिष्ठति सचदोषःप्रयत्नेननशक्यमतिवर्तितुम् २१ एकदोषोप्यन न्योस्तिसोद्यप्रभृतिसत्यवान् संवत्सरेणक्षीणायुर्देहत्यागंकरिष्यति २२ अश्वपतिरुवाच एहिसावित्रिगच्छत्वंअन्यंवरयशोभने नस्यदोषोमहानेकोगुणानाक्रम्यवर्तते २३ यथामांभगवानाहनारदोदेवसंमतः संवत्सरेणसोत्यायुर्देहत्यागंकरिष्यति २४ सावित्र्युवाच सकृज्जल्पंतिराजानःसकृज्जल्पंतिपंडिताः सकृत्कन्याप्रदीयेतत्रीण्येतानिसकृत्सकृत् २५

योदारः यउदारइतिसंधिरार्षः १८ १९ २० अतिवर्तितु मुल्लंघयितुं २१ अनन्यःमुख्यः २२ २३ २४ २५

बालायुरत्यायुः २६ २७ २८ २९ ३० समुसत्य उद्धानंकृत्वा ३१ इतिज्येष्ठमाहात्म्यटीकायां

दीर्घायुरथबालायुःसगुणोनिर्गुणोपिवा सकृद्वृत्तोमयाभर्ताद्वितीयंनवृणोम्यहम् २६ मनसानिश्चितंकार्यततो वाचाविधीयते कर्मणाक्रियतेपश्चात्प्रमाणंमनसस्तत: २७ नारदउवाच स्थिराबुद्धिर्नरश्रेष्ठसावित्र्यादुहितुस्तव नैषावारयितुंशक्याधर्मादस्मात्कथंचन २८ नान्यस्मिन्पुरुषेयस्यामतिर्भवतिनिश्चितम् प्रदानमेवतस्मान्मेरोचतेदुहितुस्तव २९ राजोवाच अविचार्यमयाप्युक्तंनथ्यंभगवतोवच: करिष्यतितदेवंवैगुरुर्हिभगवान्नाम ३० नारदउवाच अविघ्नमस्तुसावित्र्याःप्रदानंदुहितुस्तव एवमुक्त्वासमुत्सृत्यनारदस्त्रिदिवंगत: राजापिदुहितुःसर्वंचैवाहिकमथाकरोत् ३१ इतिश्रीभविष्योत्तरपु० ज्येष्ठमासमाहात्म्येचतुर्विंशोऽध्याय:२४

स्कंदउवाच ततोदृष्ट्वाद्विजान्सर्वान्ऋत्विज:सपुरोहितान् समाहूयतिथौपुण्येप्रययौकन्ययासह १ मेधारण्यंसमागत्यद्युमत्सेनाश्रमंनृपः तत्रपश्यन्महात्मानंशाल्यवृक्षसमाश्रितम् २ कौप्यांवृत्स्यांसमासीनंचक्षुर्हीनंनृपंतदा सराजातस्यराजर्षेःकृत्वापूजांयथाविधि ३ वाचास्कनियतोभूत्वाचकारात्मनिवेदनम् तस्यधर्मासनंचैवदत्वावचनमब्रवीत् ४ किमागमनमित्येवमथोराजानमब्रवीत् तस्याःसर्वमभिप्रायमितिकर्तव्यतापतिम् ५ सत्यवंतंसमुद्दिश्यसर्वमेवन्यवेदयत् सावित्रीनामराजर्षेकन्येयंममशोभना ६ तांस्वधर्मेणधर्मज्ञस्तुषत्वार्थंगृहाणमे द्युमत्सेनउवाच च्युतःस्वराज्याद्वनवासमाश्रित श्चरामिधर्मंनियतानपत्निनम् कथंत्वमर्हावनवासमाश्रमेसहिष्यतेसाशमिमंसुतातव ७



वृसीव्रतिनामासनम् व्रतिनांमासनं वृसीइत्यमरः ३ ४ ५ ६ ७ ७

अश्वपतिरुवाच आशांनार्हसिमेहंतुंसोत्कदात्मजागतस्यच अभिनन्द्यागतंप्रेम्णा प्रत्याख्यातुंनचार्हसि ८ अरूपोगुणयुक्तश्चत्वंममाहंतवापिच स्नुषांप्राप्यचमेकन्यांभार्यार्थीभवतःसुतः ९ द्युमत्सेनउवाच पूर्वमेवाभिलषितोसंबंधोमेत्वयासह भ्रष्टराज्यस्त्वहमितिन्यूनएवविचारितम् १० ततःसर्वान्समानीयह्यिज्ञानाश्रमवासिनः यथाविधिसमुद्वाहंकारयामासतुर्नृपौ ११ दत्वाचाश्वपतिःकन्यांयथार्हंसपरिच्छदाम् ययौस्वकीयभवनंयुक्तःपरमयामुदा १२ सत्यवानपिभार्यांतांलब्ध्वासर्वगुणान्विताम् मुमुदेसापिनलब्ध्वाभर्तारंमनसेप्सितम् १३ गतेपितरिसर्वाणिन्यस्तान्याभरणानिच जगृहेवल्कलान्येववस्त्रंकाषायमेवच १४ परिचारैर्गुणैश्चैवप्रश्रयेणदमेनच सर्वकामक्रियाभिश्चसर्वेषांतुष्टिमावहत् १५ एवंतत्राश्रमेतेषांसदानिवसतांसतां कालरुक्षपश्यतांकश्चिदत्यक्रामतभोनृप १६ सावित्रीतुशयानापिनिष्ठत्यपिदिवानिशम् नारदेनयदुक्तंतद्वाक्यमनसिधारयत् १७ इतिस्त्रीभविष्योत्तरपु०ज्येष्ठमाहात्म्यपंचविंशोऽध्यायः २५ ७ स्कंदउवाच ततःकालेबहुतिथेव्यतिक्रांतेकदाचन प्राप्तःसकालस्तद्वाक्याद्यत्रपत्युर्मृतिर्नृप १ प्राप्तःसकालोमर्तव्ययत्रसत्यव्रतानृप गणयत्यांचसावित्र्यादिवसंदिवसंप्रति २ यद्वाक्यंनारदेनोक्तंवर्ततेत्रदिनित्यशः व्रतंत्रिरात्रमुद्दिश्यदिवारात्रस्थितोभवत् ३ चतुर्थेहनिकर्तव्यमितिसंचिंत्यभामिनी नच्छुत्वानियमंदुःखंबुध्वादुःखान्वितोनृपः ४

१७ इतिज्येष्ठमाहात्म्यटीकायांपंचविंशोऽध्यायः २५ ७ तद्वाक्यान्नारदवाक्यात्तेनकथितइत्यर्थः १ २ नारदेनयद्वाक्यमुक्तंयच्चदिनित्यशः वर्ततेनदवसरः प्राप्तइत्यर्थः ३ चतुर्थेहनिकर्तव्यंपारणमितिशेषः बुध्वाज्ञात्वादुःखंकष्टसाध्यंनियमम् ४ ७

५ यस्मिन्दिने भर्तुर्निधनकारणं मृत्कारणं तद्दिवसंज्ञात्वा ६ अत्रांतरेमरणकालात्पूर्वदिवसत्रयमध्ये त्रिदिनस्यनियमंव्रतंचका
उत्थायवाक्यंसावित्रीमब्रवीत्परिसांत्वयन् द्युमत्सेनउवाच अनिनीद्योयमारंभ स्त्वयारब्धोनृपात्मजे ५ त्रयाणां
दिवसानांहिस्थितिं परमदुश्चराम् स्कंदउवाच ज्ञात्वानद्दिवसंविप्राभर्तुर्निधनकारणम् ६ अत्रांतरेचनियमंत्रि
दिनस्यमनस्विनी अस्मिन्नदिनेचमर्तव्यंतदासत्यवतामुने ७ कुठारंप्रतिगृह्यपीठकंचैवस्वव्रत प्रतस्थेवनवासा
यसावित्रीवाक्यमब्रवीत् ८ नगंतव्यंत्वयाचाद्यममवाक्येनमानद अथवागम्यतेसाधु मयासहवनंव्रज ९ सं
वत्सरंचसंपूर्णमाश्रमेस्मिन्ममप्रभो तद्वनंद्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो १० नाहंस्वतंत्रःस्वश्रोणिपृच्छस्वपि
तरोमम नाभ्याप्रस्थापितागच्छमयासहशुचिस्मिते ११ एवमुक्तातदातेनभर्त्रासाकमलेक्षणा श्वश्रूश्वशुरयोः
पादावभिवाद्येदमब्रवीन् १२ वनंद्रष्टुसमिच्छेयंआज्ञामत्रप्रदीयताम् उचावचंसाध्वीवरमेकंप्रयच्छथ १३
भर्त्रासहवनंगंतुमतित्वरयतेमनः तस्यास्तद्वचनंश्रुत्वाद्युमत्सेनोब्रवीदिदम् १४ व्रतंकृतंत्वयाभद्रेपारणंकुरुसुव्र
ते पारणांतेततोभीरुगंतुंवाथत्वमर्हसि १५ सावित्र्युवाच नियमश्चकृतोस्माकंरात्रौचंद्रोदयेसति जाते
मयाप्रकर्तव्यंभोजनंतातमेशृणु १६ वनदर्शनकामास्मिभर्त्रासहममाद्यवै नमेतत्रभवेत्ग्लानिर्भर्त्रा सहनराधिप
१७ इत्युक्त्वाकृतदाराजाद्युमत्सेनोमहीपतिः यत्तेभिलषितंपुत्रिनत्कुरुष्वसुमध्यमे १८ नमस्कृत्यतुसावित्री
श्वश्रूश्वशुरयोरपि सहितानृपशार्दूलतेनसत्यवतांप्रभो १९ आलोकयंतीभर्तारंतंचकालेमनस्विनी वनंचफलि
तंदृष्ट्वापुष्पितंद्रुमसंकुलं २०

रेतिशेषः ७ मरणदिवसवृत्तांतमाह कुठारमिति पीठकं काष्ठच्छेदनाधारभूतंकाष्ठं ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ श्वश्रूश्वशुरयोश्चरणाविति शेषः १९ २० ७५

२१ २२ कठिनं काष्टं पाठयामासदारयामास मूलइतिशेषः २३ २४ २५. २६ नस्येउत्संगंददाविनिशो-

द्रुमाणांचैवनामानिमृगाणांचैवभामिनी पश्यंतीमृगयूथानिरुदद्यनप्रवेपनि २१ तत्रगत्वासत्यवान्वै फलान्यादा
यसत्वरः काष्ठानिचसमादायबबंधभारकंतदा २२ कठिनंपाटयामासकृत्वावृक्षावलोकनम् वटवृक्षस्यसासा
ध्वीउपविष्टामहासती २३ काष्ठपाटयतस्तस्यजाताशिरसिवेदना ग्लानिश्चमहतीजातागात्राणांवेपथुस्तदा २४
आगत्यवृक्षसामीप्यंसावित्रीमिदमब्रवीत् ग्लानिश्चमहतीजाताशिरस्यपिचवेदना २५ कंटकैर्भिद्यतेभद्रेशि
रोमेशूलसंमिनैः उत्संगेतवसक्थ्नोणिस्वपुमिच्छामिसव्रते २६ तथेत्युक्काविशालाक्षीतस्यमृत्योर्मनस्विनी प्रा
संकालंमन्यमानातस्मैतत्रैवभामिनी २७ सत्यवानपिरुक्षस्तु कृत्वोत्संगंशिरस्तथा तावत्तत्रसमागच्छत्पुरुषःकृ
ष्णपिंगलः २८ इतिस्त्रीभविष्योत्तरपु॰ ज्येष्ठमासमाहात्म्येषड्विंशोऽध्यायः २६ ७ ऋषयऊचुः
किंचकारतुसाध्वीसाएकाकीवनसंस्थिता दुःखशोकभयाक्रांताऽसहायामनस्विनी १ स्कंदउवाच ज्ञा-
त्वागतासक्षधर्मज्ञेऽआगतःस्वयमेवहि ज्वाल्यमानोवपुषाददर्शाथत्वभामिनी २ उवाचवाक्यंवाक्यज्ञाकस्त्वं-
लोकेभयंकरः क्षीणायुस्तुवरारोहेभर्तातवमनस्विनी ३ देवीदुर्विषहतेजःसोढुंशक्योननेश्वरम् इत्यवेहि
महाभागेस्वयमागमनंमम ४ इत्युक्तानांवरारोहांतस्यदेहान्महात्मनः अंगुष्ठमात्रंपुरुषंबध्वापाशेनसंस्थिरं
५ विचकर्षततोवेगाद्गृहीत्वाप्रस्थितःपुरीम् सावित्रीतुततःपश्चादनुयातिस्मतंपतिम् ६ यमउवाच निवर्त-
स्वमहाभागेत्वंदूरंसमुपागता गत्वास्वभवनंशीघ्रंकुरुचैवोर्ध्वदेहिकम् ७

पः २७ २८ इतिज्येष्ठमा

हात्म्यटीकायांषड्विंशोऽध्यायः २६ ७ १ धर्मज्ञोयमः २ ३ ४ ५ ६ ७

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

एवमुक्तातुसातेनप्रत्युवाचयमंतदा सावित्र्युवाच नश्रमोनत्वमेग्लानिःसकाशात्तवमानद ८ विशेषतस्त्वभ
र्तुर्मेकुतोग्लानिःस्करेश्वर धर्मेणत्वंपालयसेधर्मेणत्वंविवर्धसे ९ नाफलंदर्शनंयस्मात्सतामुक्तंकदाचन आ
हुःसप्तपदींमैत्रीमितिवेदविदोविदुः १० संतुष्टस्तेनवाक्येनधर्मराजोयमस्तदा वराणामीश्वरोदातावरंतस्यै
दिदेशह ११ चक्षुःप्राप्तिंचसावध्रेश्वश्रूश्वशुरयोस्तदा राज्यप्राप्तिंपितुःपुत्रशतंचैवात्मनस्तथा १२ जीवित्व
तदाभर्तुर्ब्रह्मन्नतत्रतदाज्ञया प्रदक्षिणंततःकृत्वाधर्मराजायसव्रता १३ तथेत्युक्त्वाधर्मराजोजगामस्वकमालयम्
सागतावदसान्निध्यकृत्वोत्संगेशिरस्ततः १४ प्रबुद्धस्तुततोब्रह्मन्सत्यवानिदमब्रवीत् मयास्वपंवरारोहे
दृष्टमद्यैवभामिनि १५ तत्सर्वकथितंतस्यैयद्वृत्तंसर्वमेवतत् तथाचकथितःसर्वःसंवादश्चयमेनहि १६ अ
स्तंगतेततःसूर्येद्युमत्सेनोमहीपतिः पुत्रस्यागमनंकांक्षन्निनश्चेत्स्वधावति १७ आश्रमादाश्रमंगच्छन्पुत्रद
र्शनकाक्षया आवयोरध्वर्यंष्टिःकगतेतिविनावयोः १८ एवंसविविधंक्लेशान्सपत्नीकोमहीपतिः चकारदुः
खतप्तःसन्पुत्रपुत्रेतिचासकृत् १९ अकस्माद्देवराजेंद्रोलब्धचक्षुर्महेश्वरः तेदृष्ट्वापरमाश्चर्यंचक्षुःप्राप्तिंद्वि
जोत्तमाः २० सांत्वपूर्वंतदावाक्यमूचुस्तेचयथाभृशम् चक्षुःप्राप्तामहाराजंश्चिंतेमहामने २१ पुत्रेणच
समंयोगंःप्राप्स्यसेनृपसत्तम स्कंदउवाच यावदेवंवदंत्येतेनापसाद्विजसत्तमाः २२ सावित्रीसहितःप्रा
प्तःसत्यवान्द्विजसत्तमाः नमस्कृत्यद्विजान्सर्वान्मातरंपितरंततः २३ सावित्रीचततोब्रह्मन्ववंदेचरणा
विति श्वश्वूश्वशुरयोर्ब्रह्मन्सावित्रीकमलेक्षणा २४

१९ २० २१ २२ २३ २४

२५ २६ २७ २८ २९ ३० अभिषिंचस्वात्मानमितिशेषः ३१ ३२ ३३

मुनयऊचुः किंतुजानासिसावित्रि कारणंवरवर्णिनि वृद्धस्यचक्षुषःप्राप्तिस्वश्वशुरस्यवरानने २५ सावित्र्युवाच नजानामिमुनिश्रेष्ठाश्चक्षुषःप्राप्तिकारणम् चिरंस्थितस्तुमेभर्तानेनकालव्यतिक्रमः २६ सत्यवानुवाच अस्याःप्रभावात्संजातंनदृश्यंयत्रकारणम् तत्सर्वंविद्यतेविप्राःसावित्र्या स्तपसःफलम् २७ व्रतस्यैवतु माहात्म्यंदृष्टमेतन्मयाधुना स्कंदउवाच एवंतुवदतस्तस्यतदासत्यवतःप्रभो पौराःसमागतास्तस्मैश्वश्वशुर्नृपतिर्हृतः येनराजन्बलाद्राज्यंहृतंक्रूरेणमंत्रिणा २८ अमात्येनहृतःसोपिइतिपौराःसमागताः पौराऊचुः उत्तिष्ठराजशार्दूलस्वंराज्यंपालयप्रभो ३० अभिषिंचैवराजेंद्रपूर्वंमंत्रिपुरोहितैः स्कंदउवाच सगत्वाराजशार्दूलःस्वपुरजनसंवृतम् ३१ पितृपैतामहंराज्यंसंप्राप्तंचसमात्मना सावित्रीसत्यवाश्चैवपरांमुदमवापह ३२ जनयामासपुत्राणांशतंवैबाहुशालिनाम् व्रतस्यैवतुमाहात्म्यात्तस्यापितुरजायत ३३ पुत्राणांचशतंब्रह्मन्प्रसन्नाच्चयमात्तथा एतत्तेकथितंसर्वंव्रतमाहात्म्यमुत्तमम् ३४ क्षीणायुर्जीवितोभर्ताव्रतस्यास्यप्रभावतः कर्तव्यंसर्वनारीणांश्चैवैधव्यफलप्रदम् ३५ इतिश्रीभविष्योत्तरपुराज्येष्ठमाहात्म्येसप्तविंशोऽध्यायः २७ ७

स्कंदउवाच पुरावृंदारकोनामब्राह्मणोलोकविश्रुतः वेदशास्त्रपुराणज्ञोधनीचबहुबांधवः १ देवसेनेतिविख्याताभार्यारूपगुणान्विता धर्मपत्न्यातयासार्द्धंससुखंचिरमन्वभूत् २ कदाचिज्जरयाव्याप्तः पुत्रहीनःसदुःखितः कृत्वाव्रतानिबहुशोदानानिचयथाविधि ३

३४ ३५ इतिज्येष्ठमासमाहात्म्यटीकायां सप्तविंशो

१ध्यायः २७ ७ ज्येष्ठस्नानमाहात्म्यंप्रतिवक्तुमितिहासंप्रस्तौति पुरेत्यादिना १ २ ३

गहनंदुर्गमंवनंयानइत्यन्वयः ४ ५ ६ ७ ८ ९ १० ११ अंतरि·



नलेभेसंततिंपितृक्रुणमुक्तिकरीयदा तदैवयातोगहनंप्राणानुद्दातुंमहद्वनम् ४ सनिद्राहाररहितोधिकलोभू त्तदाद्विजः चतुर्थेदिवसेप्राप्तेमूर्छितःपतितोवने ५ करुणाद्रोहिभगवान्ज्ञात्वानस्यापिनिश्चितम् द्विजरूपंस मासाद्यतमुत्थाप्यवचोब्रवीत् ६ ब्राह्मणउवाच कोसित्वंकुतआयातःकिमर्थंत्यजसित्यसून् वाक्यंतदा र्थवच्छ्रुत्वास्ववृत्तांतंन्यवेदयत् ७ श्रुत्वैवपुनरूचेतंद्विजरूपीजनार्दनः सरवेस्वभवनंगच्छव्रतंकुरुमयोदितम् ८ ज्यंष्ठमासेतुसंप्राप्तेप्रातःस्नानदिनेदिने कुरुत्वंब्राह्मणश्रेष्ठभानावनुदितेसति ९ कुरुष्वब्रह्मचर्येणहविर्भुङ्निय तेंद्रियः त्रिविक्रमंसमभ्यर्च्यदधिभक्तंसमर्प्यच १० जलसेकंचवृक्षेषुब्राह्मणानांगृहेगृहे एवंकृतेद्विजश्रेष्ठपुत्रस्त वभविष्यति ११ उक्त्वेवातिरितोजातःसद्विजोद्भुतदर्शनः तंविष्णुरूपंनिश्चित्यप्रययौस्वगृहंप्रति १२ तेनोक्तस कलंकर्तुमुद्यतोभूत्तयासह प्रातःस्नानंकृतवतोनिशामंतेदिनेदिने १३ कदाचिद्दैवयोगेनपुलिनेवृक्षसंकुले श- रद्दत्यांमहाघोरं व्याघ्रमेकददर्शसः १४ बुभुक्षितइवात्यर्थंतस्यांतिकमुपाययौ भयव्याकुलितःसोपिजलपा त्रमचिक्षिपत् १५ तस्यांबुकणिकास्पर्शाद्दिव्यदेहोबभूवह सउवाचप्रसन्नात्माधन्योहंतवदर्शनात् १६ व्या- घ्रउवाच ब्रह्मन्पुरात्यहंव्याधःकृताहिंसाप्यनेकधा तद्दोषाद्व्याघ्रतांप्राप्तोमुक्तोहंतवदर्शनात् १७ पुण्यंकरोषि किंभद्रतद्देहिमदनुग्रहात् स्कंदउवाच एवमुक्तस्तदातेनव्याघ्रेणद्विजपुंगवः १८ ददौमासकृतंपुण्यंतेनस्वर्लोकमा- गतः पुनश्चकारविप्रोपिनद्भुतंमहदद्भुतम् १९ तस्यपुण्यप्रभावेनजातःपुत्रोमहौजसः तदातद्वचनंतथ्यंमुनेब्रह्मकु लोद्भवः २०



तः अंतर्हितः १२ १३ १४ १५ १६ १७ १८ १९ २०

स्कंद उवाच एतत्स्नानस्यमाहात्म्यंकथितंहिजसत्तमाः यदंबुकणिकास्पर्शान्मुक्तःपरमहिंसकः २१ द्विजोपितनयं लेभेवेष्णवंविष्णुसन्निभम् पुनःकिंश्रोतुमिच्छावस्तत्सर्वंकथयस्वनः २२ इतिश्रीभविष्यपुराणेज्येष्ठमाहात्म्येअष्टाविंशोऽध्यायः २८ ७ ऋषयऊचुः ज्येष्ठस्नानस्यदानस्यमाहात्म्यश्रवणस्यच फलंविस्तरतोब्रूहिपुराणंवदतांवर १ स्कंद उवाच शृण्वंतुऋषयःसर्वेज्येष्ठस्नानफलश्रुतिम् यांश्रुत्वामुच्यतेजंतुस्त्रिविधादपिपातकात् २ वृषभस्थेसवितरिज्येष्ठस्नानंकरोम्यहम् विप्रेष्टुमात्रस्तुजलेऽघानिविलयंतिनः ३ ज्येष्ठस्नानंप्रकर्तव्यंयावन्नैवोदितोरविः ज्येष्ठयामार्द्धपर्यंतंउदकेयत्रकुत्रचित् ४ तत्रसर्वाणितीर्थानिगंगादीनिवसंतिहि नावत्स्नानंप्रकर्तव्यंयावद्यामार्द्धकंभवेत् ५ ततःशपंतिचास्नातान्दैवेनोपहतान्जनान् अतःस्नानंप्रकर्तव्यंज्येष्ठमासेनरोत्तमैः ६ ईर्ष्ययाथलोभाभ्यांसेवयावासमागमात् हृगल्लोकापवादाच्चनिर्मितेनयदृच्छया ७ भीत्या परवशेनैवकर्तव्यंस्करवल्लिप्सया कलौतुपापबाहुल्यात्ज्येष्ठस्नानंसुदुर्लभम् ८ यमेनगोपितंभीत्याप्रार्थ्ययित्वात्रिविक्रमम् विघ्नानिसंभवंतीहस्वल्पपुण्यवतांनृणाम् ९ ऋषयऊचुः यमेनमासमाहात्म्यंगोपितंकेनहेतुना विघ्नानिकुरुतेकस्मात्ज्येष्ठेपुण्यवतांनृणाम् १० एतत्कौतूहलंश्रोतुमिच्छामस्तद्वदस्वनः स्कंद उवाच अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् ११ यच्छ्रुत्वाभवतागच्छेत्संशयोहृदिसास्थितः पुरामाहिष्मतीपुर्यांब्राह्मणःकनकाह्वय १२ सर्वविद्यापरिभ्रष्टोमूरखोनिंदापरायणः कृषिकर्मकरोनित्यंकर्षविक्रयकारकः १३

यावदध्यायसमाप्ति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

अनेकव्यवसायेनकुटुंबोदरपूरकः तथापिनाभवत्तृप्तिःकुटुंबस्यदुरात्मनः १४ जघानपथिकान्मार्गेकुटुंबोद रपूर्तये तथापिनाभवत्तृप्तिःचौर्यकुर्वन्द्विजाधमः १५ एवंप्रतिदिनंकुर्वन्माहिष्मत्यांद्विजाधमः कस्मिंश्चित्स मयेदृष्टोधृतस्तैर्ग्रामवासिभिः १६ बबंधुस्ताडयामासुर्बहिर्निष्कासितःपुरात् उवासकतिचित्कालमरण्येग्राम सन्निधौ १७ निशायांगृहमागत्यपुनरेवचनंययौ अरण्येस्थापदान्हत्वाभक्षयामासनिर्घृणः १८ एवंप्रकुर्वतस्त स्यकालोबहुतरोगतः कालेनबहुनाराजन्ज्येष्ठमासःसमागतः १९ निशीथेकनकोरण्यादागतःस्वगृहंप्रति जहारवस्त्रालंकारान्पुनर्गंतुंवनंययौ २० मार्गेददर्शसरितमुत्तीर्यवनमाययौ अज्ञातज्येष्ठमासस्यस्नानजा तंद्विजन्मनः २१ प्रत्यहंगहनादेत्यस्तेयेनापादिताबहून् गृहीत्वावनमायातिनदास्नातिदिनेदिने २२ एवंमा सोगतस्तस्यस्नानतोज्ञाननःसदा ज्येष्ठशुक्लचतुर्दश्यांनिशीथेद्विजसत्तमः २३ जहारधनवस्त्राणिबध्वाग्रंथिं बहिर्ययौ तावत्प्रभातसमयेदृष्ट्वालोकानितस्ततः २४ पलायनपरोभूत्वासरित्तीरमुपाययौ तत्रैवचजनान् दृष्ट्वापूर्णिमास्नानतत्परान् २५ नस्करेतिवदन्लोकस्तत्पृष्ठेसमुपागतः सोप्यमार्गेणसरितमुत्तर्तुत्वरयाय-
यौ २६ पृष्टेकाष्ठैश्चपाषाणैस्ताडयामासतंजनम् दृष्ट्वाशिरसितभारंअगाधेपयसिस्थितः २७ पपातसलि लेतस्मिन्पंचत्वंसमुपागतः वैकुंठादागतंदिव्यविमानंसूर्यवर्चसम् २८ किमिदंकिमिदंचेतिविस्मिताःस-
कलाजनाः तत्रस्थैःपुरुषैःकैश्चिद्धृतोनीतोजलद्विजः २९ कनकोयद्विजोत्रस्थोऽस्माभिर्ग्रामाद्बहिःकृतः तत्प्र णान्परमरूपसंप्राप्तःकनकोद्विजः ३०

२५ २६ २७ २८ २९ ३०

२८

तान्विमानात्ततोदूतान्प्रत्यूचुर्दिव्यपूरुषाः ३१ दिव्यपुरुषाऊचुः केनपुण्येनसंप्राप्तंवैकुंठाद्यानमागतम् दूताऊचुः अज्ञानज्येष्ठमासस्यस्नानेनासंसुदुर्लभम् ३२ तच्छ्रुत्वायानमारुह्यवैकुंठभुवनंगतः सरूपतांभगवतःसंप्राप्तः कनकोद्विजः ३३ तच्छ्रुत्वापरमदुःखंप्राप्तःसंयमिनीपतिः गोपयामासमाहात्म्यंसंप्रार्थ्यजगतांपतिम् ३४ इतिवःकथितंविप्राःमासस्नानफलंशुभम् ३५ इतिश्रीभविष्योत्तरपु॰ज्येष्ठमासमाहात्म्येएकोनत्रिंशोऽध्यायः २९ ॐ स्कंदउवाच शृण्वंतुऋषयःसर्वेमाहात्म्यस्यचयत्फलम् प्राप्यतेपुंभिः शुक्लस्यनतत्कृतुशतैरपि १ सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् यत्फलंजपयज्ञेनमाहात्म्यश्रवणेनतत् २ माहात्म्यंसकलंशृण्वन्नपुनर्जन्मभाग्भवेत् समग्रंवातदर्द्धंवातदर्द्धंवातदर्धकम् ३ अध्यायंवातदर्धं वाश्लोकंश्लोकार्द्धमेववा यःशृणोतिनरोभक्त्यातस्यपुण्यमनंतकम् ४ श्रेयांसिबहुविघ्नानिस्वल्पपुण्यवतां द्विजाः तस्मात्पुण्यंप्रकर्तव्यंनरैर्विघ्नोपशांतये ५ यदिविघ्नंसमापन्नंस्नानेश्रवणकर्मणि नत्याज्यंतद्विघ्नभयात्पुण्यंकर्मचकारयेत् ६ विघ्नानिनाशमायांतिभ्रंसकृत्सुपुण्यकर्मणा बहूनिसंतिपुण्यानिकलौचोक्तानियानिच ७ तेषुश्रेष्ठतमंप्रोक्तंपुराणश्रवणंकलौ गोघ्नःस्त्रीघ्नःकृतघ्नश्चब्रह्मघ्नःपितृघातकः ८ मातृहामद्यपीकुष्टीस्तेयीविश्वासघातकः तेसर्वेप्रतिमुच्यंतेपुराणश्रवणात्कलौ ९

अथास्मिनध्याये माहात्म्यश्रवणफलंप्रस्तौति शृण्वंतित्यादिना १ २ ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ अत्रार्थेइतिहासमाहृष्ट १४ १५ लेभेइतिपूर्वान्वयि नकिंचनलेभेइति कुर्युबवाह्या

पुराणश्रवणंकार्यंबालवृद्धानुरैरपि निष्कामैश्चसकामैश्चउत्तमाधममध्यमैः १० पुराणश्रवणंकार्यंस्त्रीशूद्रैःप
नितैरपि तत्तत्फलमवाप्नोतियथामनसिनिश्चितम् ११ अकामेनसकामेनश्रास्थयावाप्यनास्थया स्पर्धयाकप
टेनापिनिस्पृहेणस्पृहावता १२ पुराणश्रवणेनैवप्राप्नुवंतिमनोरथान् अभक्त्याश्रवणेनापिपापनिष्ठोदिवंगतः
१३ अत्रार्थेकथयिष्यामिकथांपापप्रणाशिनीम् द्वारावत्यांपुराकश्चिद्देवशर्माद्विजाधमः १४ ब्रह्मकर्मपरिभ्र
ष्टः सर्वदाप्रेतकर्मकृत् सर्वदादुष्टकर्माणिचकारापिनकिंचन १५ लेभेकुटुंबवाह्यार्थंदस्युवृत्तिंचकारसः नस्मि
न्पुरवरेरम्येबहवोवत्सरागताः १६ अथतद्दैवयोगेनमासःशुक्लःसमागतः तत्रनागरिकाःसर्वेशुक्लस्नानार्थमुद्यताः
१७ बलिपूजांसमागृह्यगोमत्यांययुरन्वहम् तत्रस्नात्वाजपंकृत्वाययुस्तेविष्णुमंदिरम् १८ ततःसर्वेसमागम्य
व्यासंकृत्वाद्विजोत्तमम् पूजयित्वायथाशक्त्यावस्त्रालंकरणादिभिः १९ माहात्म्यश्रवणंतस्मात्कुर्युर्ज्येष्ठस्य-
सादरम् एवंयामद्वयंतत्रस्थित्वापश्चाभिजालयम् २० जग्मुर्दिनेषुगच्छत्सुकेषुचित्स्कद्विजाधमः स्तेयकर्तु
समुद्युक्तःसोपियानोनिरंतरम् २१ गूढस्थानसमायुक्तःकिन्नेयमितिचिंतयन् नलेभेवत्सरंतत्रगतास्तबहवोनरा
राः २२ अद्यश्वोवाहरिष्यामिवस्त्राण्याभरणानिच एवंचिंतयमानस्यत्रागतापूर्णिमाशुभा २३ तस्यांसमु
त्सुकाःसर्वेकृत्वास्नानादिकाःक्रियाः तथापुराणश्रवणंकृत्वाव्यासस्यपूजनम् २४ वस्त्रालंकरणैर्द्रव्यैः
फलैस्तांबूलसंयुतैः तद्द्वारमभवत्तत्रहृष्टास्तदस्युर्व्यचिंतयन् २५

२९

र्थेकुटुंबपूरणार्थं १६ १७ १८ १९ २० २१ २२ २३ २४ २५

२६ २७ २८ २९ ३० ३१ ३२ ३३

अद्याहं घातयिष्यामि व्यासं तद्वचनेच्छया अस्य सर्वे हरिष्यामि ममेदं देववचोदितम् २६ इतिनिश्चित्यमनसि स्वयं तत्र समागतः पौराणिकं समभ्यर्च्य ददवत्पतितो भुवि २७ अकिंचनोस्म्यहं विप्रदत्तं तवकलेवरम् दासोहमिति मां मत्वा सेवां कृत्वा यथासुखम् २८ सर्वेभ्योप्यधिकां भक्तिं दर्शयामास कृत्रिमाम् ततो विनिर्गताः सर्वे यातेस्तं निग्मते जसि २९ तत्रावशिष्टोप्येकाकी धूर्तः पौराणिकस्तथा ततः पौराणिको राजन् समारुष्य इतस्ततः ३० ग्रंथिं बध्वा ददौ तस्य मस्तके सुदृढं तराम् तया नग्नशिराजातोत्दृष्यमाणो मुहुर्मुहुः ३१ एवं विनिर्गतौ तौतु मार्गे दुष्टो व्यचिंतयत् ततोसौ त्दृदमार्गेण तेन साकं ययौ शनैः ३२ त्दृदे बहुजनाकीर्णे पलायनपरोभवत् तदैव प्रसरन् मार्गे कूपे निरुदके पतत् ३३ नापश्यत्तं यदा विप्रो तदे वाकुलितो भृशम् कोलाहलकृतस्तेन सर्वे तत्र समागताः ३४ अहो तेनैव दुष्टेन त्दृतं सर्वाखिलं मम दुष्टोहं मंदबुद्धिश्च विश्वस्तोहं कथं जनाः ३५ अविज्ञातप्रबंधे च विश्वसंति नराधमाः मद्वृत्तेनाशमायांति विडाले मूषको यथा ३६ ७ ७ ७ ७ ७

३४ ३५ ३६ ७ ७ ७ ७

एवंनद्दचनंश्रुत्वापौराराजानमब्रुवन् राजाभृत्यान्समाहूयइदंवचनमब्रवीत् ३७ पुरद्वारेषुकी
लानिसर्वेस्थित्वाइतस्ततः बात्यमभ्यंतरेचैवअंतस्थंबात्यमेवच ३८ नयात्येवंविधंकार्यंदस्योश्चा
न्वेषणंतथा ततःसमुदितेभानौचौरान्वेषणतत्पराः ३९ कूपांतेददृशुःकेचित्केचिद्राजानमू
चिरे कूपान्निष्काशितस्तूर्णंप्राणशेषोनृपाज्ञया ४० ददौसवींद्विजेंद्रायसोपिप्राणान्मुमोचह
दिव्यदेहधरोभूत्वाविमानवरमास्थितः ४१ तान्पौरान्प्रणनामाशुअयंभवदनुग्रहः ततः
स्तेविस्मिताःसर्वेमहिमानंप्रतुष्टुवुः ४२ सोपिवैकुंठनिलयंमाहात्म्यश्रवणाद्ययौ स्कंदउ
वाच एतन्मयानिगदितंमाहात्म्यंतवविस्तरात् ४३ पुराणश्रवणस्यापिन्रभक्तस्यापिमा
यिनः किंपुनर्भक्तिभावेनशृण्वतांभाग्यमुत्तमम् येनकुर्वंतिवैमोहात्स्वशक्त्याव्यासपूजनम्
४४ दरिद्ररोगसंयुक्तास्तेभवंतिभवेभवे पुराणंयेनशृण्वंतिनपश्यंतित्रिविक्रमम् ४५ नेमूक
बधिराश्चांधाःपंगवश्चनसंशयः एवंश्रुत्वास्कंदमुखान्प्रीणंतस्तेद्विजोत्तमाः ४६ ७



४४ ४५ एवंश्रुत्वेतिसूतोक्तिः ४६ ७ ७ ७ ७

वर्षतः पुष्पवर्षाभिः षडास्यंनंदनोद्भवैः ननृतुश्चापरेकेचित्पुपूजुश्चोपचारकैः ४७ श्रुत्वाप्रमुदिताः सर्वेमाहात्म्यंज्येष्ठसंभवम् सूतंप्रपृच्छुस्तेसर्वेमाहात्म्यंचपुनः शुचेः ४८ इतिश्रीभविष्योत्तरपुराणेज्येष्ठमासमाहात्म्येस्कंदऋषिसंवादेफलश्रुतिवर्णनंनाम त्रिंशोऽध्यायः ३० ७ इतिश्रीव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवे ऋष्टमेधर्मस्कंधेचतुर्थेमासमाहात्म्यस्तबकेज्येष्ठमासमाहात्म्यकथनंनामतृतीयंमाहात्म्यसंपूर्णम् ३ ७ श्री गोपालकृष्णोजयति श्रीसीतारामचंद्रार्पणमस्तु श्रीरस्तु शुभम्

श्रीगोपालकृष्णोजयति· श्रीसीतारामचंद्रोजयति श्रीरस्तुशुभम् श्रीर्जयति

यह ज्येष्ठमाहात्म्य मुंबईमें पंडित श्रीधर शिवलालके प्रज्ञायुक्तनाम ज्ञानसागर छापखानामे छाप्यो फाल्गुनशुक्ल ११ सौम्यवार· संवत् १९४४ शाके १८०९ तारीख २२ माहेफेब्रूवारी सन१८८८ इ०


इतिश्रीमासस्तवकेज्येष्ठमासमाहात्म्यंसंपूर्णम्